आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ५

ईशावास्योपनिषत्सटीकशांकरभाष्योपेता

रत्नागिरिनिवासिभिर्वेदशास्त्रज्ञैर्महामहोपाध्यायैः आगाशे इत्युपाह्वै-
र्बालशास्त्रिभिः संशोधिता ।

ब्रह्मानन्दसरस्वतीकृतमीशावास्यरहस्यम् ।

शंकरानन्दकृतेशावास्यदीपिका ।

रामचन्द्रपण्डितकृतेशावास्यरहस्यविवृतिः ।

एतत्पुस्तकत्रितयमानन्दाश्रमस्थपण्डितैः संशोधितम् ।

उवटाचार्यकृतमीशावास्यभाष्यम् ।

आनन्दभट्टोपाध्यायकृतमीशावास्यभाष्यम् ।

अनन्ताचार्यकृतमीशावास्यभाष्यम् ।

इदं पुस्तकत्रयं मुंबापुरीनिवासिभिर्वेदशास्त्रज्ञैर्महामहोपाध्यायै-
र्बोडस इत्युपाह्वै राजारामशास्त्रिभिः संशोधितं च

एतानि

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

" आनन्दाश्रममुद्रणालये "

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितानि ।

द्वितीयेयमङ्कनावृत्तिः ।

शालिवाहनशकाब्दाः १८२७

मूल्यम् ४।४ आणकाः ।

अथेशावास्योपनिषद्भूमिका ।

भो भोः सुधियो विद्वांसो विदितमेवैतत्तत्रभवतां, यत्किल संप्रत्यस्मिञ्जगति विभिन्नेषु द्वीपेषु विभिन्नेषु देशेषु च ये ये धर्मास्तत्प्रतिपादका ग्रन्थाश्चोपलभ्यन्ते । तेषु वैदिकधर्मस्य वैदिकग्रन्थानां चातिप्राचीनत्वं मूलभूतत्वं च निर्विवादमेव सर्वैराद्रियते । यद्यपि स्वस्वधर्माभिमानग्रहगृहीताः केचन वेदस्य प्राचीनत्वे विवदन्तो दृश्यन्ते । ते तथैव विवदन्तु नाम । तथाऽपि निर्मत्सराः समधियो विवेकिनो नात्र विप्रतिपद्यन्ते । त इमे आर्याणां चतुर्विधपुरुषार्थसाधनभूताश्चतुर्दशविद्यानां चतुःषष्टिकलानां च मूलभूता वेदा भगवता जगत्कारणेन परमात्मनाऽऽदिकवये ब्रह्मणे हृदैवोपदिष्टाः । स च ब्रह्मा तानितरेभ्यः प्रकाशयामास । तद्यथा—

समाहितात्मनो ब्रह्मन्ब्रह्मणः परमेष्ठिनः ।
हृद्याकाशादभून्नादो वृत्तिरोधाद्विभाव्यते ॥
ततोऽभूत्त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् ।
स्वधाम्नो ब्रह्मणः साक्षाद्वाचकः परमात्मनः ॥
स सर्वमन्त्रोपनिषद्वेदबीजं सनातनम् ।
तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह ॥
धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तयः ।
ततोऽक्षरसमाम्नायमसृजद्भगवानजः ॥
अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ।
तेनासौ चतुरो वेदांश्चतुर्भिर्वदनैर्विभुः ॥
सव्याहृतिकान्सोंकारांश्चातुर्होत्रविवक्षया ।
पुत्रानध्यापयत्तांस्तु ब्रह्मर्षीन्ब्रह्मकोविदान् ॥
ते तु धर्मोपदेष्टारः स्वपुत्रेभ्यः समादिशन् ।
ते परम्परया प्राप्तास्तत्तच्छिष्यैर्धृतव्रतैः ॥
चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभिः । इति ।

एवं ब्रह्मणः सकाशात्तत्पुत्रा ये मरीच्यादयस्तेभ्यः । शिष्यप्रशिष्यादिपरम्परया वेदाः प्रसृता बभूवुः । द्वापरादिषु वेदविस्तरकर्तारोऽन्ये वेदव्यासा आसन् । अस्मिन्नप्यन्तरे—

पराशरात्सत्यवत्यामंशांशकलया विभुः ।
अवतीर्णो महाभाग वेदं चक्रे चतुर्विधम् ॥

ऋगथर्वयजुस्साम्नां राशीनुद्धृत्य वर्गशः ।
चतस्रः संहिताश्चक्रे मन्त्रैर्मणिगणा इव ॥ इति ।

ताश्च ऋग्यजुःसामाथर्वाख्याश्चतस्रः संहिताः पैलवैशंपायनजैमिनिसुमन्तुसंज्ञकैश्चतुर्भिः स्वशिष्यैर्ग्राहयामास भगवान्पाराशर्यो वेदव्यासः । ते च पैलादयः स्वस्वशिष्यानध्यापयामासुः स्वां स्वां संहिताम् । तत्र यजुर्वेदधरस्य वैशंपायनस्य याज्ञवल्क्यप्रभृतयो बहवः शिष्या आसन् ।

अथ कदाचिद्भगवान्वैशंपायनो ब्रह्महत्यां बालहत्यां स्वस्रीयहत्यां चावाप्तवानाकस्मिकेन दैवयोगेन । तदुक्तं विष्णुपुराणे—

ऋषिर्योऽद्य महामेरौ समाजे नाऽऽगमिष्यति ।
तस्य वै सप्तरात्रात्तु ब्रह्महत्या भविष्यति ॥
पूर्वमेवं मुनिगणैः समयोऽभूत्कृतो द्विज ।
वैशंपायन एवैकस्तं व्यतिक्रान्तवांस्तदा ॥
स्वस्रीयं बालकं सोऽथ पदा स्पृष्टमघातयत् । इति ।

एवमृषिकृतसमयानुसारेण मेरुपर्वत ऋषिसमाजेऽगमनाद्ब्रह्महत्यामनिच्छयाऽपि पदा स्पृष्टस्य बालस्य मरणात्स्वस्रीयहत्यां बालहत्यां च लब्धवतो वैशंपायनस्य शिष्या गुरोर्निदेशेन तत्पापशान्तय उग्रं तपश्चेरुः । अतस्तेषां चरकाध्वर्यव इति प्रथाऽऽसीत् । एवं तपश्चरतोऽन्यान्सहाध्यायिनोऽवजानन्निव—

याज्ञवल्क्यश्च तच्छिष्य आहाहो भगवान्कियत् ।
चरितेनाल्पसाराणां चरिष्येऽहं सुदुश्चरम् ॥

सतीर्थ्यानधिक्षिपता याज्ञवल्क्येन—

इत्युक्तो गुरुरप्याह कुपितो यावलं त्वया ।
विप्रावमन्त्रा शिष्येण मदधीतं त्यजाऽऽश्विति ॥

सोऽपि प्रभाववाञ्शिष्यो याज्ञवल्क्यो गुरोर्वैशंपायनादधीतं यजुषां गणं छर्दित्वा तदन्तिकान्निर्गतः । अथ तच्छर्दितान्यजुर्गणान्वीक्ष्य वेदलोलुपा ऋषयश्छर्दितस्य विप्ररूपेणाऽऽदानमनुचितमिति विचार्य तित्तिरसंज्ञकपक्षिरूपेण याज्ञवल्क्यत्यक्तान्यजुर्गणानाददुः । ततश्च सा तैत्तिरीयेति प्रसिद्धा शाखाऽभवत् ।

अथ याज्ञवल्क्यो गुरोर्वैशंपायनादप्यधिकानि यजूंषि गवेषयन्भगवन्तमर्कं चतुर्णां वेदानामीश्वरमुपतस्थे । तथा च श्रुतिः—

ऋग्भिः पूर्वाह्णे दिवि देव ईयते । यजुर्वेदे तिष्ठति मध्ये अह्नः ।
सामवेदेनास्तमये महीयते । वेदैरशून्यस्त्रिभिरेति सूर्यः ॥ इति ।

तस्य भक्त्या तुष्टो भगवानादित्यो वाजिरूपधरो भूत्वा—
यजूंष्ययातयामानि मुनयेऽदात्प्रसादितः । इति ।

एवं याज्ञवल्क्योऽर्कादिदमधीत्य कण्वमध्यंदिनप्रभृतीन्स्वशिष्यानध्यापयामास । ते च रविणाऽश्वरूपेण वाजेभ्यः केसरेभ्यो वाजेन वेगेन वा संन्यस्तास्त्यक्ताः शाखा वाजसनीसंज्ञास्तासां ग्रहणाद्वाजसनेयिन इत्याचक्षते ।

तदेवं यजुर्वेदस्य द्वौ भेदौ । वैशंपायनेन महर्षेर्वेदव्यासादधीता चरकाध्वर्यवादीन्स्वशिष्यानध्यापिता संहिता कृष्णयजुःसंहितेत्यभिधीयते । याज्ञवल्क्येन वाजिरूपधरात्सूर्यादधीता कण्वमध्यंदिनादीनध्यापिता संहिता शुक्लयजुःसंहितेत्याचक्षते । शुक्लयजुर्वेदस्य पञ्चदश शाखाः । तदुक्तं होलीरभाष्ये—

"आदित्येनाधायित्वादादित्यान्युच्यन्ते । वाज इत्यन्नस्य नामधेयम् । 'अन्नं वै वाज' इति श्रुतेः । वाजस्य सनिर्दानं यस्य महर्षेरस्ति सोऽयं वाजसनिः । तस्य पुत्रो वाजसनेयः । तस्य याज्ञवल्क्य इति नामधेयम् । तेन याज्ञवल्क्येन तानि यजूंषि महर्षिभ्यः पञ्चदश समर्पितानि"।

केषांचिन्मते सप्तदश भेदाः । तदेवं शाखाभेदेऽपि न संहिताभेदः । केवलं पाठभेद एव ।

सेयं शुक्लयजुःसंहिता काण्डद्वयात्मिका । "ऋग्भिः स्तुवन्ति यजुर्भिर्यजन्ति" इत्यभिधानाद्यजनात्मिकायामस्यां संहितायां अथाध्यायस्य प्रथममन्त्रमारभ्यैकोनचत्वारिंशाध्यायसमाप्तिपर्यन्तं दर्शपूर्णमासाद्यश्वमेधान्तं कर्मकाण्डं प्रतिपादितम् । अन्तिमे चत्वारिंशेऽध्यायेऽष्टादशभिर्मन्त्रैर्ज्ञानकाण्डं प्रतिपादितम् । तस्य च ज्ञानकाण्डप्रतिपादकत्वाद्ब्रह्मविद्यापराणां सहेतोः संसारस्यात्यन्तोच्छेदकत्वाद्ब्रह्मविद्योपनिषदित्यभिधीयते । उपनिषदिति 'षद्लृ विशरणे' इत्यस्यान्तर्भावितण्यर्थस्य विशरणार्थस्य धातोः क्विपि रूपम् । उपनितरां सादयति संसारहेतुभूतामविद्यां नाशयतीत्युपनिषद्ब्रह्मविद्या । तदर्थप्रतिपादकग्रन्थोऽप्युपचारादुपनिषदित्यभिधानवान्भवति । यथाऽऽहुराचार्याः—

"उपनीयेममात्मानं ब्रह्मापास्तद्वयं ततः ।
निहन्त्यविद्यां तज्जं च तस्मादुपनिषन्मता" ॥ इति ।

सेयं संहितोपनिषदिति· ईशावास्यमित्यादिमं मन्त्रमुपजीव्येशावास्योपनिषदिति चाभिधीयते ।

ननु—"ईशावास्यादयो मन्त्राः कर्मस्वविनियुक्ताः । तेषामकर्मशेषस्याऽऽत्मनो याथात्म्यप्रकाशकत्वात्" इत्येतेषां मन्त्राणां कर्मस्वविनियोगे कारणमुक्तम् । तत्र प्रथमाध्यायमारभ्यैकोनचत्वारिंशत्तमाध्यायपर्यन्तं तेषां तेषां मन्त्राणां तेषु तेषु दर्शपूर्णमासाद्यश्वमेधान्तेषु यथा विनियोगस्तथैव कर्मप्रतिपादकत्वाभावेऽपि 'सहस्रशीर्षे' त्यादिवदीशावास्यादीनामपि मन्त्राणां कर्मसु यथाकथंचन विनियोगः किं न स्यात्—! इति चेत् । मैवम् ।

"ऋचा पुरुषं ब्रह्माणं दक्षिणतः पौरुषेण नारायणेनाभिष्टौति । 'सहस्रशीर्षा पुरुष' इत्यनेन षोडशर्चेन" ॥

इत्यादिवत्कर्मसु प्रमाणतो विनियोगाभावात्कर्मप्रतिपादकत्वाभावाच्च । तर्हि यागकल्पना कुतो न क्रियत—इति चेत् । न । विशेषं परिहृत्यैव सा कल्पना भविष्यति । अत एव श्रीमदाचार्यभगवत्पादैः—

"विरोधादेवाविनियोगस्तेषां मन्त्राणां कर्मणि"

इति प्रतिपादितम् । तस्माद्विहितकर्मणा शुद्धान्तःकरणस्याधिकारिण आत्मस्वरूपप्रकाशनेन शोकमोहादिसाधनाज्ञाननिवृत्तिपूर्वकमात्मस्वरूपं दर्शयतीत्यभिधेयसंबन्धप्रयोजनवानयमीशावास्यादिमन्त्रसमूहः ।

सेयमुपनिषद्भाष्यटीकादीपिकारहस्यादिसंवलिता सर्वसुलभा भवत्विति विचार्याऽऽनन्दाश्रमाधिपतिना स्वकीयग्रन्थावल्यां संगृहीता । इयं च कलिकाताराजधान्यां वङ्गदेशीयास्यातिकसमाजानुमत्यां शंकरभाष्यानन्दगिरिकृतटीकासहिता मुद्रिताऽऽसीत् । सा चाधुना दुष्प्राप्या संवृत्ता । किंच तत्रोवटादिभाष्यत्रयरहस्यदीपिकादिसंग्रहाभावान्न सा विदुषां प्रीतयेऽलमितीयं पुनर्मुद्रिता । अस्यां च—

१ आनन्दज्ञान[1]विरचितटीकासनाथमीशावास्यशांकरभाष्यम् ।

२ उवटापरपर्यायोवटाचार्यकृतमीशावास्यभाष्यम् ।

३ ब्रह्मानन्दकृतमीशावास्यरहस्यम् ।

४ शंकरानन्दकृतेशावास्यदीपिका ।

---

१ केषुचित्पुस्तकेषु 'आनन्दज्ञान' इतिकेषु चित्पुस्तकेषु 'आनन्दगिरि' रिति चोपलभ्यते तथाऽपि तत्र न कश्चिद्भेदः । नामद्वयमेकस्यैवेति विदुषां मतम् ।

५ रामचन्द्रपण्डितकृतेशावास्यरहस्यविवृतिः ।

६ आनन्दभट्टोपाध्यायकृतमीशावास्यभाष्यम् ।

७ अनन्ताचार्यकृतमथवाऽऽनन्ताचार्यकृतमीशावास्यभाष्यम् ।

एतानि सप्त संगृहीतानि सन्ति । तत्रोवटार्यानन्दभट्टोपाध्यायानन्ताचार्यकृतं भाष्यत्रयं न केवलमस्या उपनिषद एव, अपि तु समग्राया अपि शुक्लयजुःसंहिताया भाष्याणि तैः कृतानीत्यन्तिमवाक्यात्प्रतीयते । आनन्दभट्टोपाध्यायोऽनन्ताचार्यश्च काण्वाविवेति प्रतीयते । उवटार्यस्तु माध्यंदिनः । तेन तच्छाखापाठमाश्रित्यैव व्याख्यातम् । 'रहस्यविवृति' स्तु स्वतन्त्रैव । न सा ब्रह्मानन्दकृतरहस्यविवृतिः । तेन तु प्रथमं श्लोकरूपेण संक्षेपतो रहस्यं विरच्य तस्यैव विवृतिः कृतेति प्रतीमः । शुक्लयजुःसंहितायां सायणमाधवाचार्यकृतं महीधरकृतं च भाष्यद्वयं वर्तते । शार्मण्यदेशमुद्रितपुस्तके टिप्पणीरूपेण द्वयमपि संगृहीतम् । कालिकातामुद्रितपुस्तके महीधरभाष्यमेकमेव वर्तते । भाष्यद्वयमपीदं प्रसिद्धत्वान्मुद्रितत्वात्संप्रत्यपि सुलभत्वाच्च नास्माभिः संगृहीतम् । स एष प्रयत्नो विदुषां मोदमावहन्सर्वत्र विजयतामित्याशास्ते—

तत्रभवदन्तेवासी—

वामनशास्त्रिशर्मा.

मुंबई,--गिरगांव मार्गशीर्ष
शुक्लप्रतिपत् १८१०

ॐ तत्सद्ब्रह्मणे नमः ।

॥ अथ शांकरभाष्यम् ॥

ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्याऽऽत्मनो याथात्म्यप्रकाशकत्वात् । याथात्म्यं चाऽऽत्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणम् । तच्च कर्मणा विरुध्येतेति युक्त एवैषां कर्मस्वविनियोगः । नह्येवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं

॥ आनन्दगिरिटीका ॥

येनाऽऽत्मना परेणेशा व्याप्तं विश्वमशेषतः ।
सोऽहं देहद्वयीसाक्षी वर्जितो देहतद्गुणैः ॥ १ ॥

ईशा वास्यमित्यादिमन्त्रान्व्याचिख्यासुर्भगवान्भाष्यकारस्तेषां कर्मशेषत्वशङ्कां तावद्व्युदस्यति । तथाहि कर्मजडाः केचन मन्यन्ते स्म । ईशा वास्यमित्यादयो मन्त्राः कर्मशेषा मन्त्रत्वाविशेषादिषे त्वादिमन्त्रवत् । अतः पृथक्प्रयोजनाद्यभावादव्याख्येया इति तान्प्रत्याह—**ईशा वास्यमित्यादय इति । कर्मस्वविनियुक्ता इति** । इषे त्वेति शाखां छिनत्तीत्यादिवद्विनियोजकप्रमाणादर्शनात्प्रकरणान्तरत्वाच्चेत्यर्थः । श्रौतविनियोगाभावेऽपि बर्हिर्देवसदनं दामीत्यस्य बर्हिर्लवनप्रकाशनसामर्थ्याद्बर्हिर्लवने यथा विनियोगस्तथा कर्मशेषात्मप्रकाशनसामर्थ्येन कर्मस्वेषां विनियोग इत्यपि नाऽऽशङ्कनीयमित्याह—**तेषामिति** । शुद्धादिविशेषणस्याऽऽत्मनः कर्मशेषत्वे प्रमाणाभावात्तद्याथात्म्यं न केवलं कर्मानुपयोगि किंतु कर्मणा विरुध्यते चेत्याह—**याथात्म्यं चेति** । शुद्धोऽहं स्वभावतोऽनागन्तुकेनापि पाप्मना विद्धः सर्वत्रैकोऽशरीर आकाशोपम इति जानन्न कटाक्षेणापि कर्म वीक्षते । किंत्वापातप्रतिपत्तिरप्येतादृशी निरुणद्ध्येव कर्मप्रवृत्तिमित्यर्थः । किंच यः कर्मशेषः स उत्पाद्यो दृष्टो यथा पुरोडाशादिः । विकार्यः सोमादिः । आप्यो मन्त्रादिः । संस्कार्यो व्रीह्यादिस्तदुत्पाद्यादिरूपत्वं व्यापकं व्यावर्तमानमात्मयाथात्म्यस्य कर्मशेषत्वमपि व्यावर्तयति । तथाऽऽत्मयाथात्म्यं कर्तृ भोक्तृ च न भवति । येन ममेदं समीहितसाधनं ततो मया कर्तव्यमित्यहंकारान्वयपुरःसरः कर्त्रन्वयः स्यादित्याह—**नह्येवमिति** । ननूपनिषदां जपोपयोगित्वादन्यस्य च प्रमाणस्यादर्शनो-

---

१ घ. ङ छ. ज °मर्थ्यात्तत्र क° । २ च. ज. शुद्धत्वादि° । ३ क. ख. झ. °तो न तु के° ।
४ घ. ङ. छ. °त्याधिकारा° । ५ क. ख. झ. °नाम्न निरूप्यमेवैता° ।

शा० भा० विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृरूपं वा येन कर्मशेषता स्यात् । सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् । गीतानां मोक्षधर्माणां चैवंपरत्वात् । तस्मादात्मनोऽनेकत्वकर्तृत्वभोक्तृत्वादि चाशुद्धत्वपापविद्धत्वादि चोपादाय लोकबुद्धिसिद्धं कर्माणि विहितानि । यो हि

आ० टी० न्वास्त्येवैतादृशमात्मयाथात्म्यं तत्राऽऽह—**सर्वासामिति** । यत्परः शब्दः स शब्दार्थ इति मीमांसाप्रसिद्धेः सर्वासामुपनिषदां चैकात्म्ये तात्पर्यदर्शनान्न जपोपयोगित्वमुपनिषदां शक्यं वक्तुम् । तथाहि ईशा वास्यमित्युपक्रम्य स पर्यगाच्छुक्रमित्युपसंहारादनेजदेकं तदन्तरस्य सर्वस्येत्यभ्यासदर्शनान्नैनद्देवा आप्नुवन्नित्यपूर्वतासंकीर्तनात्को मोहः कः शोक एकत्वमनुपश्यत इति फलवत्तासंकीर्तनात्कुर्वन्नेवेहेति जिजीविषोर्भेददर्शिनः कर्मकरणानुवादेना[1]सुर्या नाम त इति निन्दयैकात्म्यदर्शनस्य स्तुतत्वात्तस्मिन्नपो मातरिश्वा दधातीति युक्त्यभिधानाच्चास्यास्तावदुपनिषद ऐकात्म्यतात्पर्यं दृश्यते । एवमन्यासामप्युपनिषदामुपक्रमोपसंहारैकरूप्याभ्यासापूर्वताफलवत्तार्थवादयुक्त्युपपादनानि षट् तात्पर्यलिङ्गानि विकल्पेन समुच्चयेन चास्माभिस्तत्त्वालोके दर्शितानीति नेह प्रतन्यन्ते । किंच प्रत्ययसंवादोऽपि बलवत्त्वे कारणं प्रसिद्धम् । विद्यते चोपनिषदर्थे गीतादि[3]संवादस्तस्मादुपनिषत्पदसमन्वयेनावगम्यमानमैकात्म्यं न प्रमाणान्तरानुपलम्भविरोधेनापलपनीयम् । यथेन्द्रियान्तरेणानवगम्यमानमपि रूपं चक्षुषाऽवगम्यमानं नापह्नूयते तथैकात्म्यमपि नापह्नवार्हमित्याह—**गीतानामिति** । 'समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् । विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ' इत्यादिगीतानाम् । 'एक एव हि भूतात्मा भूते भूते व्यवस्थितः । एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ' इत्यादिमोक्षशास्त्राणां चैकात्म्यपरत्वादित्यर्थः । यद्येतादृशमात्मतत्त्वं तर्हि निरभिकारित्वात्कर्मकाण्डमुच्छिद्येतेत्यपि नाऽऽशङ्कनीयमित्याह—**तस्मादिति** । औपनिषदात्मयाथात्म्यविज्ञानवत इष्यत एव कर्मकाण्डाप्रामाण्यम् । यथा न हिंस्यात्सर्वा *भूतानीति निषेधशास्त्रार्थनिश्चयवत इष्यत एव श्येनादिविध्यप्रामाण्यम् । यथा च तीव्रक्रोधाक्रान्तस्वान्तं प्रत्येव श्येनादिविधिप्रामाण्यं तथा मिथ्यात्मदर्शिनं प्रत्येव कर्मविधिप्रामाण्यमित्यर्थः । अत्र जैमिनिप्रभृतीनां संमतिमाह—**यो हीत्यादिना** । अर्थित्वादियुक्तस्य कर्मण्यधिकारः षष्ठेऽध्याये प्रतिष्ठापितः । अर्थित्वादि च मि-

---

* घ. ङ. सर्वभूतानीत्यत्र बहुपुस्तकेषु सर्वा भूतानीत्येव पाठो दृश्यते स श्रुतिमूलक इत्यनुमीयते सर्वा इति सर्वाणीत्यर्थकमेवाऽऽर्षत्वादिति ज्ञेयम् ।

---

१ क. ख. °तीत्यभिधायिन्याश्चास्या° ङ. °तीतियुक्त्यभिधायिन्याश्चास्या° । २ क. ख. ङ. °वत्कार° । ३ क. ख. ङ. °धेनोपलम्भनं° । ४ क. ख. °पह्नुवते ।

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
ॐ । शान्तिः शान्तिः शान्तिः ।

हरिः ॐ । ईशा वास्यमिदꣳ सर्वं यत्किंच जगत्यां जगत् ।

शा० भा० कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनाऽदृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्यात्मानं मन्यते सोऽधिक्रियते कर्मस्विति ह्यधिकारविदो वदन्ति । तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनाऽऽत्मविषयं स्वाभाविकमज्ञानं निवर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्ति । इत्येवमुक्ताधिकार्यभिधेयसंबन्धप्रयोजनान्मन्त्रान्संक्षेपतो व्याख्यास्यामः ॥

ईशा वास्यमित्यादि । ईशा ईष्टे इतीट् तेनेशा । ईशिता परमेश्वरः परमात्मा सर्वस्य । स हि सर्वमीष्टे सर्वजन्तूनामात्मा सन्प्रत्यगात्मतया तेन स्वेन रूपेणाऽऽत्मनेशा वास्यमाच्छादनीयम् । किम् । इदं सर्वं यत्किंच यत्किंचिज्जगत्यां पृथिव्यां जगत्तत्सर्वं स्वेनाऽऽत्मनेशेन प्रत्यगात्मतयाऽहमेवेदं

आ० टी० थ्याज्ञाननिदानम् । न हि नभोवन्निष्क्रियस्य स्वत एव दुःखासंसर्गिणः परमानन्दस्वभावस्य सुखं मे स्याद्दुःखं मे मा भूदित्यर्थित्वं शरीरेन्द्रियसामर्थ्येन च समर्थोऽहमित्यभिमानित्वं मिथ्याज्ञानं विना संभवतीत्यर्थः । यस्मादात्मयाथात्म्यप्रकाशका मन्त्रा न कर्मविधिशेषभूता न च मानान्तरविरुद्धास्तस्मात्प्रयोजनादिमत्त्वमपि तेषां सिद्धमित्याह—तस्मादेत इति । व्याख्येयत्वमुक्त्वा प्रतिपदं व्याचष्टे—ईशेति । ईश ऐश्वर्येऽस्य धातोः क्विपि लुप्ते कृदन्तरूपमीट्तस्य तृतीयैकवचनमीशेति । ननु कर्तरि क्विब्विधानात्परमात्मनश्चाविक्रियत्वात्कथं क्विबन्तशब्दवाच्यतेति तत्राऽऽह—ईशितेति । मायोपाधेरीशनकर्तृत्वसंभवात्क्विबन्तशब्दवाच्यता न विरुध्यते निरुपाधिकस्य च लक्ष्यत्वं भविष्यतीत्यर्थः । ईशित्रीशितव्यभावेन तर्हि भेदः प्राप्त इत्याशङ्क्याऽऽह—सर्वजन्तूनामात्मा सन्निति । यथाऽऽदर्शादिषु प्रतिबिम्बानामात्मा सन्बिम्बभूतो देवदत्त ईशिता भवति तथा कल्पितभेदेनेशित्रीशितव्यभावसंभवान्न वास्तवभेदानुमानं संभवतीत्यर्थः । वस आच्छादने । अस्य रूपं वास्यम् । तत्त्वत ईश्वरात्मकमेव सर्वं भ्रान्त्या यदनीश्वररूपेण गृहीतं तत्सर्वमीश्वर एवाऽऽत्मैवेति ज्ञानेनाऽऽच्छाद-

१ क. ख. ग. °ककर्मविज्ञा° । २ क. ख. झ. ञ. ट. सन्, तेन स्वेनाऽऽत्म° । ३ क. ख. झ. म. °त्मनाऽह° । ४ क. ख. झ. °रमेश्वरस्य चाक्रि° ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनम् ॥ १ ॥

शा० भा० सर्वमिति परमार्थसत्यरूपेणानृतमिदं सर्वं चराचरमाच्छादनीयं स्वेन परमात्मना। यथा चन्दनागर्वादेरुदकादिसंबन्धजक्लेदादिजमौपाधिकं दौर्गन्ध्यं तत्स्वरूपनिघर्षणेनाऽऽच्छाद्यते स्वेन पारमार्थिकेन गन्धेन तद्वदेव हि स्वात्मन्यध्यस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगद्द्वैतरूपं जगत्यां पृथिव्यां जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नामरूपकर्माख्यं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात्। एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रयसंन्यास एवाधिकारो न कर्मसु। तेन त्यक्तेन त्यागेनेत्यर्थः। न हि त्यक्तो मृतः पुत्रो[1] वा भृत्यो वाऽऽत्मसंबन्धिताया अभावादात्मानं पालयत्यतस्त्यागेनेत्ययमेव वेदार्थः। भुञ्जीथाः पालयेथाः। एवं त्यक्तैषणस्त्वं मा गृधः, गृ-

आ० टी० नीयम्। सर्वात्मक ईश्वरोऽस्मीति ज्ञातव्यमेष तत्त्वोपदेशश्छान्दोग्ये तत्त्वमसीतिवदित्यर्थः। 'ब्रह्मैव सर्वमात्मैव सत्प्रकाशविशेषतः। हेयोपादेयभावोऽयं न सन्स्वप्नवदीर्यते'। उक्तं च—'न बन्धोऽस्ति न मोक्षोऽस्ति न विकल्पोऽस्ति तत्त्वतः। नित्यप्रकाश एवास्ति विश्वाकारो महेश्वरः' इति। यस्यौपदेशिकज्ञानमात्रेणानृतदृष्टिर्न तिरस्क्रियते तस्य विचारादिप्रयत्नेन तत्त्वप्रकाशे सत्यनृतदृष्टिस्तिरस्क्रियेतेत्यभिप्रेत्य दृष्टान्तमाह—यथेति। चन्दनागर्वादेरुदकादिसंबन्धादार्द्रीभावादिना जातं यद्दौर्गन्ध्यमौपाधिकं मिथ्या तद्यथा तत्स्वरूपनिघर्षणाभिव्यक्तेन स्वाभाविकेन गन्धेनाऽऽच्छाद्यते तद्वद्विचारादेः स्वरूपसद्भावाभिमिथ्याबुद्धेर्बाधकत्वं संभवतीत्याह—तद्वदेव हीति। स्वभावोऽनादिरविद्या तत्कार्यं स्वाभाविकमित्यादिबाधयोग्यत्वप्रदर्शनार्थं विशेषणम्। एवं विचारादिप्रयत्नवतोऽनृतदृष्टितिरस्कारसंभावनामुक्त्वा युक्त्यनभिज्ञस्य सर्वमिदमहं चेश्वर एवेति भावनायामधिकृतस्य युक्तिकुशलस्य च विचारेऽधिकृतस्य सर्वकर्मसंन्यास एवाधिकार इह मन्त्रे विवक्षितस्तेन त्यक्तेनेत्यत्र त्यागपरामर्शात्। त्यजतैव हि तज्ज्ञेयं त्यक्तुः प्रत्यक्परं पदमित्यन्यत्राप्युक्तत्वात्पुत्राद्येषणायाश्चित्तविक्षेपहेतुत्वेन प्रसिद्धत्वाच्चेत्यभिप्रेत्याऽऽह—एवमीश्वरात्मेति। [3]चिकीर्षितं संन्यासं स्तौति—तेन त्यक्तेनेति। त्यागेनाऽऽत्मा रक्षितः स्यान्निष्क्रियात्मस्वरूपावस्थानानुकूलत्वात्त्यागस्येत्यर्थः। संन्यासिनः शरीरसंधारणोपयुक्तकौपीनाच्छादनभिक्षाशनादिव्यतिरिक्तेऽपि कथंचिद्द्रव्यपरिग्रहे रागश्चेत्प्राप्नोति तन्निरोधे यत्नः कर्तव्यः। तस्य प्रधानविरोधित्वादित्यभिप्रेत्य नियमविधिमाह—एवं त्यक्तैषण इति। स्विदिति निपातस्य सामान्यार्थ-

१ क. ख ग झ. ञ. ट. °नेवार्थः। २ घ. ङ. ठ. °रादेव वस्तुबलस°। च. छ. ज° °रादेवस्तुबलस°। ३ घ. ङ. छ. ज. ठ. विविदिषितं।

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतꣳ समाः ।

शा॰भा॰ धिमाकाङ्क्षां मा कार्षीर्धनविषयाम् । कस्यस्विद्धनं कस्यचित्परस्य स्वस्य वा धनं मा काङ्क्षीरित्यर्थः। स्विदित्यनर्थको निपातः। अथवा मा गृधः। कस्मात्। कस्यस्विद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद्गृध्येत। आत्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवेदं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृर्धि मा कार्षीरित्यर्थः ॥ १ ॥

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतयाऽऽत्मा रक्षितव्य इत्येष वेदार्थः। अथेतरस्यानात्मज्ञतयाऽऽत्मग्रहणायाशक्तस्येदमुपादिशति मन्त्रः—कुर्वन्नेवेति । कुर्वन्नेवेह निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि जिजीविषेज्जीवितुमिच्छेच्छतं शतसंख्याकाः समाः संवत्सरान्। तावद्धि पुरुषस्य परमायुर्निरूपितम्। तथा च प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीयते। एवमेवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनीत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात्प्रकारादन्यथा प्रकारान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्येत इत्यर्थः। अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जिजीविषेत्। कथं पुनरिदमवगम्यते । पूर्वेण मन्त्रेण संन्यासिनो ज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेत्युच्यते । ज्ञानकर्मणोर्वि-

---

आ॰टी॰ त्वेऽपि कस्यस्विदिति वितर्कार्थत्वमन्यत्र प्रसिद्धं तदिह न गृह्यत इत्यनर्थकमित्युक्तम्। व्यवहारदृष्ट्याऽप्यात्मन एवेदं सर्वं शेषभूतं जडस्य चित्परतन्त्रत्वादतोऽप्राप्ते विषये नाऽऽकाङ्क्षा कर्तव्या। परमार्थतस्त्वात्मैव सर्वमित्याकाङ्क्षाविषय एव नास्तीत्यर्थः ॥ १ ॥

आद्यमन्त्रस्य पूर्वार्धेन तत्त्वोपदेशः कृतस्तृतीयपादेनापरिपक्वज्ञानस्य संन्यासविधिरुक्तश्चतुर्थपादेन संन्यासिनो नियमविधिरुक्त इति प्रतिपदं व्याख्याय संक्षिप्यार्थमनुवदत्युत्तरस्य संबन्धाभिधित्सया—एवमात्मविद इत्यादिना। पूर्वमन्त्रेण ज्ञानं विहितं यस्य तस्यैवोत्तरमन्त्रेण कर्म विहितं ततः समुच्चयानुष्ठाने तात्पर्यं मन्त्रद्वयस्येत्येकदेशी शङ्कामुद्भावयति—कथं पुनरिति। शुद्धब्रह्मज्ञानकर्मणोरेकाधिकारे विरुद्धत्वादृतुगमनत्रिदण्डिधर्मवदस्त्येव तत्रापि क्रमेणैककर्तृकत्वमिति चेन्न। विशिष्टरूपभेदाद्भिन्नाधिकारत्वात्। यच्चोक्तं ज्ञानकर्मणोर्वेदविहि-

---

१ क. ख. झ. ञ. °णाश° । २ क. ख. झ. ञ. ट. °रूपितम्। ३ क ख. ज. झ. ट. °म्। यथा प्रा°। ४ क. ख. झ. ञ. ट. °रे त्व°। ५ क. ख. ग. °प्यस इ°। ६ क. ख. च. झ. °दतः प्रा°।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥ २ ॥

शा०भा०रोधं पर्वतवदकम्प्यं यथोक्तं न स्मरसि किम्। इहाप्युक्तं यो हि जिजीविषेत्स कर्म कुर्वन्। ईशा वास्यमिदं सर्वं तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनमिति च। न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति च पदम्। ततो न पुनरियादिति संन्यासशासनात्। उभयोः फलभेदं च वक्ष्यति। इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्चोत्तरेण निवृत्तिमार्गेणैषणात्रयस्य त्यागः। तयोः संन्यासपथ एवातिरेचयति। न्यास एवात्यरेचयदिति च तैत्तिरीयके। द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः। प्रवृत्तिलक्षणो धर्मो

भा०टी०तत्वेन शुद्धिसाम्याद्विरोधोऽसिद्ध इति तदसत्। ऋतुगमनत्रिदण्डिधर्मयोरप्यविरोधप्रसङ्गात्। तदुभयं नैकस्य विहितमिति चेत्तुल्यमेतत्प्रतिषेधात्तत्र न समुच्चय इति चेदिहापि न कर्मणा न प्रजया नानुध्यायाद्बहूञ्छब्दानित्यादिप्रतिषेधस्तुल्यः। केवलकर्मविषयो निषेध इति न च वाच्यं केवलपदव्यवच्छेद्याभावात्समुच्चयविधेरप्यनिश्चितत्वात्तस्मान्न समुच्चये तात्पर्यं मन्त्रद्वयस्येत्याह— **ज्ञानकर्मणोर्विरोधमिति**। कर्तृत्वाद्यध्यासाश्रयं कर्म शुद्धत्वाकर्तृत्वादिज्ञानेनोपमृद्यत इति संबन्धग्रन्थे यथोक्तं सहानवस्थानलक्षणं विरोधं किं न स्मरसि येनैकाधिकारत्वं तयोः कल्पयसीत्यर्थः। मन्त्रलिङ्गादपि तयोर्भिन्नाधिकारत्वं प्रतीयत इत्याह—**इहाप्युक्तमिति**। जिजीविषो रागिणः कर्म विहितं सर्वमीश्वर एवेति ज्ञानवतस्त्यागो विहितः। किंच धनसंपन्नस्यैव कर्मण्यधिकारः। प्रथममन्त्रार्थाधिकारिणश्च धनाकाङ्क्षानिषेधेन कर्माधिकारनिषेधः प्रतीयत इत्यर्थः। जिजीविषा हि कर्माधिकारिण एव न ज्ञानाधिकारिण इत्यत्र प्रमाणमाह—**न जीवित इति**। **अरण्यं** स्त्रीजनासंकीर्णमाश्रममियाद्गच्छेदिति पदं वेदशास्त्रस्थितिस्ततोऽरण्यवासोपलक्षितात्संन्यासान्न पुनरियात्कर्मश्रद्धया न प्रत्यावृत्तिं कुर्यादिति जिजीविषादिरहितस्य संन्यासविधानादित्यर्थः। इतश्च नैकफलकामस्य ज्ञानकर्मणोरधिकारः प्रतिपत्तव्य इत्याह—**उभयोरिति**। को मोहः कः शोक एकत्वमनुपश्यत इति सनिदानानर्थप्रहाणं ज्ञानफलं वक्ष्यति। संसारमण्डलान्तर्गतमेव च देशान्तरप्राप्त्याद्युक्तं हिरण्यगर्भपदप्राप्त्यादिलक्षणं कर्मफलं वक्ष्यति। अग्ने नय सुपथेत्यन्तेनेत्यर्थः। नारायणोपनिषद्वाक्यमपि भिन्नाधिकारित्वे प्रमाणयति—**इमौ द्वावेवेति**।

१ क. ख. 'ध्यायेद्ब°'।

असुर्या नाम ते लोका अन्धेन तमसाऽऽवृताः ।
ताꣳस्ते प्रेत्याभिगच्छन्ति ये के चाऽऽत्महनो जनाः ॥ ३ ॥

शा॰भा॰ निर्वृत्तश्च विभावित इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्येण भगवता । विभागं चानयोर्दर्शयिष्यामः ॥ २ ॥

अथेदानीमविद्वन्निन्दार्थोऽयं मन्त्र आरभ्यते—असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरास्तेषां च स्वभूता लोका असुर्या नाम । नामशब्दोऽनर्थको निपातः । ते लोकाः कर्मफलानि लोक्यन्ते दृश्यन्ते भुज्यन्त इति जन्मानि । अन्धेनादर्शनात्मकेनाज्ञानेन तमसाऽऽवृता आच्छादितास्तान्स्थावरान्तान्प्रेत्य त्यक्त्वेमं देहमभिगच्छन्ति[2] यथाकर्म यथाश्रुतम् । ये के चाऽऽत्महनः । आत्मनं घ्नन्तीत्यात्महनः । के ते जना येऽविद्वांसः । कथं त आत्मानं नित्यं हिंसन्ति । अविद्यादोषेण विद्यमानस्याऽऽत्मनस्तिरस्करणात् । विद्यमानस्याऽऽत्मनो यत्कार्यं फलमजरामरत्वादिसंवेदनलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृताविद्वांसो जना आत्महन उच्यन्ते । तेन ह्यात्महननदोषेण संसरन्ति ते ॥ ३ ॥

आ॰टी॰ पुरस्तात्सृष्टिकालेऽनुनिष्क्रान्ततरौ भूतसृष्टिमनुप्रवृत्तौ भिन्नाधिकारित्वादुभयोः संन्यास एवातिरिक्तः श्रेष्ठो भवति परमपुरुषार्थाव्यवधानादित्यर्थः । व्यासवाक्यमपि संवादकमाह—द्वाविमाविति ॥ २ ॥

आद्यमन्त्रार्थं प्रपञ्चयितुं प्रथममविद्वन्निन्दा क्रियत इत्याह—अथेति । ते लोका इति तच्छब्दो यच्छब्दार्थे । यथाश्रुतमिति । येन यादृशं प्रतिषिद्धं विहितं वा देवतादिज्ञानमनुष्ठितं स तदनुरूपामेव योनिमाप्नोतीत्यर्थः । आत्महन्तृत्वस्योदरभेदिनि प्रसिद्धेः कथमविद्वांस आत्महन इत्याह—कथं तइति । उदरभेदिनोऽध्यात्माधिकारे प्रसङ्गाभावादशुद्धत्वाध्यासेन तिरस्कार एवाऽऽत्महन्तृत्वमित्याह—अविद्यादोषेणेति । यथा कस्यचिच्छुद्धस्य मिथ्याभिशापोऽशस्त्रवध उच्यते तद्वदात्मनि पापित्वाद्यध्यासोऽपि हिंसैवेत्यर्थः । अजरामरत्वादिलक्षणोऽहमिति संवेदनमभिधानं च यत्कार्यं तद्धतस्येव न दृश्यत इति हननमुपचर्यत इत्याह—विद्यमानस्येति । अस्याऽऽत्मघातस्य प्रायश्चित्तविधानादर्शनात्संसरणमेव फलमित्याह—तेन हीति ॥ ३ ॥

---

१ क. ख. °वृत्तौ च वि°। घ. ङ. च. ट. ठ °वृत्तिश्च विभावित । झ. ञ. °वृत्तौ चैव भावित । २ ग. °न्ति योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः । स्थाणुमन्येऽनुसर्पन्ति य°। ३ ज. इति शङ्कते–क°। ४ ख. घ. ज. °नो ह्यात्मा°। ५ घ. ङ. च. ज. ठ. °फालितमि°।

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन्पूर्वमर्षत्[1] ।

शा०भा० यस्याऽऽत्मनो हननादविद्वांसः संसरन्ति तद्विपर्ययेण विद्वांसो जना मुच्यन्ते ते नाऽऽत्महनः । तत्कीदृशमात्मतत्त्वमित्युच्यते[2]—अनेजदिति । अनेजत्, न-एजत् । एजृ कम्पने । कम्पनं चलनं स्वावस्थाप्रच्युतिस्तद्वर्जितं सर्वदैकरूपमित्यर्थः । तच्चैकं सर्वभूतेषु । मनसः संकल्पादिलक्षणाज्जवीयो जववत्तरम् । कथं विरुद्धमुच्यते ध्रुवं निश्चलमिदं मनसो[4] जवीय इति च । नैष दोषः । निरुपाध्युपाधिमत्त्वेनोपपत्तेः[3] । तत्र निरुपाधिकेन स्वेन रूपेणोच्यतेऽनेजदेकमिति । मनसोऽन्तःकरणस्य संकल्पविकल्पलक्षणस्योपाधेरनुवर्तनादिह देहस्थस्य मनसो ब्रह्मलोकादिदूरंगमनं[5] संकल्पेन क्षणमात्राद्भवतीत्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम् । तस्मिन्मनसि ब्रह्मलोकादीन्द्रुतं गच्छति सति प्रथमं प्राप्त इवाऽऽत्मचैतन्यावभासो गृह्यतेऽतो मनसो जवीय इत्याह । नैनद्देवा द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाण्येतत्प्रकृतमात्मतत्त्वं नाऽऽप्नुवन्न प्राप्तवन्तः । तेभ्यो मनो जवीयो मनोव्यापारव्यवहितत्वात् । आभासमात्रमप्यात्मनो नैव देवानां विषयी भवति । यस्माज्जवनान्मनसोऽपि पूर्वमर्षत्[6]पूर्वमेव गतम् । व्योमवद्व्यापित्वात् । सर्वव्यापि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन निरुपाधिकेन स्वरूपेणाविक्रियमेव सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामनेकमिव च प्रतिदेहं प्रत्यवभासत इत्येतदाह—तद्धावतो द्रुतं गच्छतोऽन्यानात्मविलक्षणान्मनोवागि-

---

भा०टी० उत्तरमन्त्रमवतारयति—यस्याऽऽत्मन इत्यादिना । अविक्रियमेकं चेदात्मतत्त्वं कथं तर्हि केचन स्वर्गगामिणः केचन नरकगामिण इति सांसारिकव्यवस्था स्यादिति चेन्मनउपाधिनिबन्धनेत्यभिप्रेत्याऽऽह—मनस इत्यादिना । उपाधेर्नुवर्तनात्[8] । विक्रियादिव्यवहाराश्रयत्वमिति शेषः । ननु मनसो देहान्तःस्थत्वाद्बहिर्गमनायोग्यत्वात्कथं वेगवत्त्वमित्याशङ्क्याऽऽह—देहस्थस्येति । जवीयस्त्वादश्वादिवत्तर्हि चक्षुरादिग्राह्यत्वं प्राप्तमित्याशङ्क्याऽऽह—नैनद्देवा इति । चक्षुरादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वात्तदविषयत्वे चक्षुरादिविषयत्वमप्यात्मनो न संभवतीत्यर्थः । मनसो वा कथं न विषय आत्मेत्यत आह[7]—यस्मादिति । यथा मनस्थं परिमाणं मनसो न विषयोऽ-

---

१ घ. ङ. छ. °मर्शत् । २ क. ख. 'नं स्थिरत्वप्र° । ३ क. ख. ग. ङ. च. छ. झ. ठ. °मत्त्वोप° । ४ ज. °धिकः स्वे' । ५ क. ख. ग. घ. ङ. च. ञ. °रस्थसंकल्पनं क्ष' । ६ घ. ङ. °मर्शत् । ७ ज. ठ. इत्यत आह । ८ ठ. 'रनिव° क. ख. झ. 'रनुवर्तमाना° । ९ घ. ङ. च. छ. ठ. °द् । क्रि° ।

तद्धावतोऽन्यानत्येति तिष्ठत्तस्मिन्नपो मातरिश्वा दधाति ॥ ४ ॥ तदेजति तन्नैजति तद्दूरे तद्वन्तिके । तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ॥ ५ ॥

शा० भा० न्द्रियप्रभृतीनत्येत्यतीत्य गच्छतीव । इवार्थं स्वयमेव दर्शयति—तिष्ठदिति । स्वयमविक्रियमेव सदित्यर्थः । तस्मिन्नात्मतत्त्वे सति नित्यचैतन्यस्वभावे मातरिश्वा मातर्यन्तरिक्षे श्वयति गच्छतीति मातरिश्वा वायुः सर्वप्राणभृत्क्रियात्मको यदाश्रयाणि कार्यकरणजातानि यस्मिन्नोतानि प्रोतानि च यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा । अपः कर्माणि प्राणिनां चेष्टालक्षणानि । अग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानि दधाति विभजतीत्यर्थः । धारयतीति वा । भीषाऽस्माद्वातः पवत इत्यादिश्रुतिभ्यः । सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वास्पदभूते सत्येव भवन्तीत्यर्थः ॥ ४ ॥

न मन्त्राणां जामिताऽस्तीति पूर्वमन्त्रोक्तमप्यर्थं पुनराह—तदेजतीति । तदात्मतत्त्वं यत्प्रकृतं तदेजति चलति तदेव च नैजति स्वतो नैव चलति स्वतोऽचलमेव सच्चलतीवेत्यर्थः । किंच तद्दूरे वर्षकोटिशतैरप्यविदुषामप्राप्यत्वाद्दूर इव । तत् उ अन्तिक इति च्छेदः । तद्वन्तिके समीपेऽत्यन्तमेव विदुषामात्मत्वान्न केवलं दूरेऽन्तिके च । तदन्तरभ्यन्तरेऽस्य सर्वस्य । य आत्मा सर्वान्तर इति श्रुतेः । अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्यास्य बाह्यतो व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वादन्तः । प्रज्ञानघन एवेति च शासनान्निरन्तरं च ॥ ५ ॥

भा० टी० त्यन्ताव्यवधानात्तथाऽऽत्माऽप्यत्यन्ताव्यवधानान्मनसो न विषयस्तद्व्यापकत्वाच्चेत्यर्थः । उक्तात्मसंभावनायोपपत्तिमाह—तस्मिन्नात्मतत्त्वे सतीति । श्रौतानि कर्माणि सोमाज्यपयःप्रभृतिभिरद्भिः संपाद्यन्त इति संबन्धाल्लाक्षणिकोऽप्शब्दः कर्मसु प्राणचेष्टायाश्चाब्निमित्तत्वप्रसिद्धेः । कारणवाचकः शब्दः कार्ये लक्षणया प्रयुक्त इत्यर्थः । ईश्वरस्यापि हिरण्यगर्भस्य नियतप्रवृत्त्यन्यथानुपपत्त्याऽधिष्ठाता परमेश्वरः संभाव्यत इत्युक्तमिदानीं मातरिश्वग्रहणमुपलक्षणार्थमादाय तात्पर्यमाह—सर्वा हीति ॥ ४ ॥

जामिताऽऽलस्यं व्यापित्वाद्बाह्यतोऽस्ति निरतिशयसूक्ष्मत्वादन्तश्चेदस्ति तर्हि निरन्तरमेकरसं न स्यान्मानाभावादित्याशङ्क्याऽऽह—प्रज्ञानघन एवेति ॥ ५ ॥

१ घ. ङ. च. ठ. इममर्थं । २ ज. ठ. °र्यकार° । ३ ञ. ञ. ढ. °र्थकर° । ४ घ. च. छ. °दिक्रि° । ५ क. ख. ङ प्राणिचे° ।

यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति ।
सर्वभूतेषु चाऽऽत्मानं ततो न विजुगुप्सते[२] ॥ ६ ॥
यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥ ७ ॥

शा० भा० यस्तु । यः परिव्राड्मुमुक्षुः सर्वाणि भूतान्यव्यक्तादीनि स्थावरान्तान्यात्मन्येवानुपश्यत्यात्मव्यतिरिक्तानि न पश्यतीत्यर्थः । सर्वभूतेषु च तेष्वेव चाऽऽत्मानं तेषामपि भूतानां स्वमात्मानमात्मत्वेन यथाऽस्य देहस्य कार्यकारणसंघातस्याऽऽत्माऽहं सर्वप्रत्ययसाक्षिभूतश्चेतयिता केवलो निर्गुणोऽनेनैव स्वरूपेणाव्यक्तादीनां स्थावरान्तानामहमेवाऽऽत्मेति सर्वभूतेषु चाऽऽत्मानं निर्विशेषं यस्त्वनुपश्यति स ततस्तस्मादेव दर्शनान्न विजुगुप्सते विजुगुप्सां घृणां न करोति । प्राप्तस्यैवानुवादोऽयम् । सर्वा हि घृणाऽऽत्मनोऽन्यद्दुष्टं पश्यतो भवत्यात्मानमेवात्यन्तविशुद्धं निरन्तरं पश्यतो न घृणानिमित्तमर्थान्तरमस्तीति प्राप्तमेव । ततो न विजुगुप्सत इति ॥ ६ ॥

इममेवार्थमन्योऽपि मन्त्र आह—यस्मिन्सर्वाणि भूतानि । यस्मिन्काले यथोक्तात्मनि वा तान्येव भूतानि सर्वाणि परमार्थात्मदर्शनादात्मैवाभूदात्मैव संवृत्तः परमार्थवस्तु विजानतस्तत्र तस्मिन्काले तत्राऽऽत्मनि वा को मोहः कः शोकः । शोकश्च मोहश्च काम[३]कर्मबीजम[४]जानतो भवति न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः । को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासंभवप्रदर्शनात्सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७ ॥

भा० टी० उक्तात्मज्ञानस्य फलं विधिनिषेधातीतजीवन्मुक्तस्वरूपेणावस्थानमित्याह—यस्त्विति ॥ ६ ॥

निरतिशयानन्दस्वरूपस्य एव दुःखास्पृष्टमात्मानमजानतः शोको भवति हा हतोऽहं न मे पुत्रोऽस्ति न मे क्षेत्रमिति । ततः पुत्रादीन्कामयते तदर्थं देवताराधनादि चिकीर्षति न त्वात्मैकत्वं पश्यतस्ततोऽन्वयव्यतिरेकाभ्यां शोकादेरविद्याकार्यत्वावधारणान्मूलाविद्यानिवृत्त्यैव शोकादेरात्यन्तिकी निवृत्तिर्विद्याफलत्वेन विवक्षिता लयमात्रस्य सुषुप्तेऽपि भावादित्याह—शोकश्च मोहश्चेत्यादिना ॥ ७ ॥

१ घ. ञ. °त्मन्नेवा° । २ विचिकित्सतीत्ययं पाठ उवटभाष्यपुस्तकस्थः । ३ क. ख. घ. ङ छ. ठ. ड. °मबीजमज्ञान° । ४ च. °मज्ञानवतो । ५ घ. ङ. च. छ. °कमोहयोरित्या° ।

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरꣳ शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयंभूर्याथातथ्यतोऽर्थान्व्यदधाच्छाश्वतीभ्यः समाभ्यः ॥ ८ ॥

*अन्धं तमः प्रविशन्ति येऽविद्यामुपासते ।

शा० भा० योऽयमतीतैर्मन्त्रैरुक्त आत्मा स स्वेन रूपेण किंलक्षण इत्याहायं मन्त्रः— स पर्यगात्स यथोक्त आत्मा पर्यगात्परि समन्तादगाद्गतवानाकाशवद्व्यापीत्यर्थः । शुक्रं शुद्धं ज्योतिष्मद्दीप्तिमानित्यर्थः । अकायमशरीरो लिङ्गशरीरवर्जित इत्यर्थः । अव्रणमक्षतम् । अस्नाविरं स्नावाः शिरा यस्मिन्न विद्यन्त इत्यस्नाविरम् । अव्रणमस्नाविरमित्याभ्यां स्थूलशरीरप्रतिषेधः । शुद्धं निर्मलमविद्यामलरहितमिति कारणशरीरप्रतिषेधः । अपापविद्धं धर्माधर्मादिपापवर्जितम् । शुक्रमित्यादीनि वचांसि पुंलिङ्गत्वेन परिणेयानि । स पर्यगादित्युपक्रम्य कविर्मनीषीत्यादिना पुंलिङ्गत्वेनोपसंहारात् । कविः क्रान्तदर्शी सर्वदृक् । नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः । मनीषी मनस [1]ईषिता सर्वज्ञ ईश्वर इत्यर्थः । परिभूः सर्वेषां पर्युपरि भवतीति परिभूः । स्वयंभूः स्वयमेव भवतीति येषामुपरि भवति यश्चोपरि भवति स सर्वः स्वयमेव भवतीति स्वयंभूः । स नित्यमुक्त ईश्वरो याथातथ्यतः सर्वज्ञत्वाद्यथातथा भावो याथातथ्यं तस्माद्यथाभूतकर्मफलसाधनतोऽर्थान्कर्तव्यपदार्थान्व्यदधाद्विहितवान्यथानुरूपं व्यभजदित्यर्थः । शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्य इत्यर्थः ॥ ८ ॥

अत्राऽऽद्येन मन्त्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः । ईशा

आ० टी० योऽयमिति । स्नुप्रक्षरणे धातुः । स्नावयन्ति शरीरमिति स्नावाः शिराः क्रान्तमतिक्रान्तं नष्टमित्युपलक्षणं भूतभविष्यद्वर्तमानदर्शी ॥ ८ ॥

प्रकरणविभागं दिदर्शयिषुर्वृत्तमनुवदति—अत्राऽऽद्येनेति । यदुक्तं भास्करेण

* उवटभाष्येशावास्यरहस्येशावास्यविवृतिषु तु नवमदशमयोर्मन्त्रयोर्द्वादशत्रयोदशयोश्च यथासंख्यं वैपरीत्यं तथा चतुर्दशैकादशयोर्वैपरीत्यं तथाऽग्ने नयेति मन्त्रः षोडशः । तथा वायुरनिलमिति पञ्चदशः । किंच वायुरनिलमित्यस्योत्तरार्धस्थाने ॐ क्रतो स्मर क्लिबे स्मर कृतꣳ स्मरेति तथा हिरण्मयेनेति सप्तदशः । किंच हिरण्मयेनेत्यस्योत्तरार्धस्थाने योऽसावादित्ये पुरुषः सोऽसावहम् ॥ १७ ॥ ॐ खं ब्रह्मेति तथा पूषन्नेकर्ष इति मन्त्रो नास्त्येव तथाऽसुर्या नामेतिमन्त्रान्तर्गतप्रेत्याभिगच्छन्तीत्यस्य स्थाने प्रेत्यापि गच्छन्तीति पाठस्तथा षष्ठमन्त्रस्थविजुगुप्सत इत्यस्य स्थाने विचिकित्सतीति पाठः । किंच दशममन्त्रस्य पूर्वार्धस्य स्थाने 'अन्यदेवाहुर्विद्याया अन्यदाहुरविद्यायाः' एवं पाठ इति ज्ञेयम् ।

[1] क. ख. ज. झ ईशिता ।

ततो भूय इव ते तमो य उ विद्यायाꣳ रताः ॥ ९ ॥

शा॰ भा॰ वास्यमिदं सर्वं मा गृधः कस्य स्विद्धनमित्यज्ञानां जिजीविषूणां ज्ञाननिष्ठासंभवे कुर्वन्नेवेह कर्माणि जिजीविषेदिति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः। अनयोश्च निष्ठयोर्विभागो मन्त्रप्रदर्शितयोर्बृहदारण्यकेऽपि प्रदर्शितः सोऽकामयत जाया मे स्यादित्यादिना। अज्ञस्य कामिनः कर्माणीति मन एवास्याऽऽत्मा वाग्जायेत्यादिवचनात्। अज्ञत्वं कामित्वं च कर्मनिष्ठस्य निश्चितमवगम्यते। तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनाऽऽत्मस्वरूपावस्थानं जायाद्येषणात्रयसंन्यासेन चाऽऽत्मविदां कर्मनिष्ठाप्रातिकूल्येनाऽऽत्मस्वरूपनिष्ठैव दर्शिता किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक

आ॰ टी॰ सर्वाऽप्युपनिषदेकं ब्रह्मविद्याप्रकरणं ततः प्रकरणभेदकरणमनुचितमिति। तदसत्। प्राणाद्युपासनविधानस्याप्युपनिषत्सु दर्शनात्। न च तदपि ब्रह्मज्ञानाङ्गमिति वाच्यम्। पृथक्फलश्रवणात्[३]। तेनापि व्याकृताव्याकृतोपासनसमुच्चयविधानस्य प्रकरणभेदेनैवेष्टत्वाद्व्याकृताव्याकृतोपासनस्य प्रकारान्तरत्वात्तस्माद्यथा कर्मकाण्डेऽग्निहोत्रादिप्रकरणं भिन्नमेवेष्यते भिन्नाधिकारत्वात्तत्तत्कर्मणस्तथोपनिषत्स्वपि भिन्नाधिकारत्वात्कर्माविरुद्धतद्विरुद्धविद्याप्रकरणभेदो न विरुध्यते। मन्त्रार्थे ब्राह्मणसंमतिं दर्शयितुमुपक्रमते—अनयोश्चेत्यादिना। तत्र वाक्ये कथमज्ञत्वमवगम्यत इत्याशङ्क्याऽऽह—मन एवेति। जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति कामयमानस्य सर्वथैव बाह्यो जायादिर्यदा न संपद्यते तदाऽध्यात्मजायादिसंपत्तिं दर्शयति—एतच्चाज्ञत्वलिङ्गं मनआदिष्वात्मत्वाद्यभिमानस्याज्ञानकार्यत्वात्। यथा च बाह्यकामिन्यलाभे सुप्तो मनोविजृम्भितकामिनीमुपभुञ्जानोऽज्ञः प्रसिद्धस्तद्वदयमपीत्यर्थः। तेषां च कर्मणां फलं संसाराप्तिरेवेत्यपि तत्रैव दर्शितमित्याह—तथा चेति। एकं साधारणमन्नं यदिदमद्यते द्वे देवानां हुतप्रहुते दर्शपूर्णमासौ वा त्रीण्यस्य[७] भोगसाधनानि मनोवाक्प्राणलक्षणानि पश्वर्थमेकं तत्पय इति सप्तान्नसर्गो दर्शितः श्रुत्या यत्सप्तान्नानि मेधया तपसाऽजनयत्पितेत्यादिना। अत्रैकैको[८] यजमान एव विहितप्रतिषिद्धज्ञानकर्मानुष्ठानात्सर्वस्य संसारस्य साक्षात्पारम्पर्याभ्यां जनकत्वात्पितोच्यते। तेषु च सृष्टेष्वन्नेषु तस्य पितुरहमिदं ममेदमित्यात्मत्वाध्यासेन मनआदिष्वितरेषु च संबन्धाध्यासेनावस्थानं संसारः प्रसिद्ध इत्यर्थः। एवं मन्त्रप्रदर्शिते निष्ठाद्वये ब्राह्मणसंमतिं दर्शयित्वा प्रकरणविभागं

१ च. °वासूपनिषत्स्वेकं। २ क. ख झ. °त् स्वेना°। ३ ज. तेन भास्करेणापि। ४ घ. ङ. ठ. °नस्यापकान्तत्वा°। ५ छ. ज. प्रकान्तत्वा°। ६ क. झ. °ध्यात्मं जा°। ७ घ. ङ. च. ज. ठ. त्रीणि स्वस्य। ८ ज. झ. °त्रैको।

शा०भा० इत्यादिना। ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम त इत्यादिनाऽविद्वन्निन्दाद्वारेणाऽऽत्मनो याथात्म्यं स पर्यगादित्येतदन्तैर्मन्त्रैरुपदिष्टम्। ते ह्यत्राधिकृता न कामिन इति। तथा च श्वेताश्वतराणां मन्त्रोपनिषदि अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमित्यादि विभज्योक्तम्। ये तु कार्मिणः कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते—अन्धं तम इत्यादि। कथं पुनरेवमवगम्यते न तु सर्वेषामित्युच्यते—अकामिनः साध्यसाधनभेदोपमर्देन यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति। यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानान्तरेण वा ह्यमूढः समुच्चिचीषति। इह तु समुच्चिचीषयाऽविद्वदादिनिन्दा क्रियते। तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते। यद्दैवं वित्तं देवताविषयं ज्ञानं कर्मसंब-

आ० टि० दर्शयति—ये तु ज्ञाननिष्ठा इत्यादिना। अत्याश्रमिभ्य इति। उत्तमाश्रमिभ्य इत्यर्थः। साध्यसाधनभेदोपमर्देन यदात्मैकत्वविज्ञानं यस्मिन्सर्वाणि भूतान्यात्मैवाभूदित्यवधारणेनोक्तं पूर्वार्धेनोत्तरार्धेन च संसारनिवृत्तिफलकमुक्तं तन्न श्रौतेन स्मार्तेन वा कर्मणा केनचिदमूढः समुच्चिचीषति। अन्धं तम इत्यादौ तु समुच्चिचीषयाऽविद्वदादिनिन्दा दृश्यते। ततः किमित्यत आह—तत्र च यस्येति। कस्य तर्हि ज्ञानस्य कर्मसमुच्चयः संभवतीत्यत आह—यद्दैवं वित्तमिति। यच्चोक्तं भास्करेणेशा वास्यमिति मन्त्रे ब्रह्मविद्यायाः प्रक्रान्तत्वात्तस्या एव समुच्चिचीषया निन्दोच्यत इति। तदसत्। न हि प्रकृतमित्येतावता संबध्यते किं तु संबन्धयोग्यम्। शुद्धब्रह्मात्मैकत्वविद्यायास्तु कर्तृत्वाद्यध्यासोपमर्दकत्वान्नास्ति कर्मसंबन्धयोग्यता। किंच यस्मिन्निष्पन्नेऽपि फलस्य व्यवधानं संभाव्यते तस्यैव सहकारिसमुच्चय इष्यते[1] दर्शादिरिह[2] त्वेकत्वमनुपश्यतः को मोहः कः शोक इत्येकत्वदर्शनसमकालमेव मोहादिनिवृत्त्यभिधानान्न कालान्तरीयफलम्। ततो न सहकारिसमुच्चिचीषा। किंचास्या[3] मन्त्रोपनिषदो ब्राह्मणे ब्राह्मणा विविदिषन्ति यज्ञेनेत्यादौ तृतीयाश्रुत्या यज्ञादेरिष्यमाणवेदने करणत्वेन संबन्धः प्रतीयते। तत्कथं दुर्बलेन प्रकरणेन सहकारितया संबन्धः प्रकल्प्यते। प्रधानस्य च विद्यायाः सहकारिसंबन्धाविधित्सया निन्देत्यप्ययुक्तम्। अत एव चाग्नीन्धनाद्यनपेक्षेतिसूत्रविरोधश्च[4] समुच्चयश्च परेणापि नेष्यते। विरोधेन[5] च परिजह्व तस्मात्कर्माविरुद्धदेवताज्ञानस्यैवात्र समुच्चयो विधित्स्यते। ननु देवताज्ञानस्य कर्मफलाति-

१ च. °ते यथा द°। २ झ °देरिवेह। ३ घ. ङ. ज. ठ. किं च ब्राह्मणा वि°। ४ च. ज. °श्च अग्नीन्धनोपलक्षितकर्मसमन्व°। ५ ग. च. छ. ज. °न चापाचक्रे त°। ङ. ठ. °न चापाचक्रमे त°।

अन्यदेवाहुर्विद्ययाऽन्यदाहुरविद्यया[२] ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १० ॥
विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह ।

शा०भा० न्धित्वेनोपन्यस्तं न परमात्मज्ञानम् । विद्यया देवलोक इति पृथक्फलश्रवणात् । तयोर्ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया न निन्दापरैवैकैकस्य पृथक्फलश्रवणात् । विद्यया तदारोहन्ति । विद्यया देवलोकः । न तत्र दक्षिणा यन्ति । कर्मणा पितृलोक इति । नहि शास्त्रविहितं किंचिदकर्तव्यतामियात् । तत्रान्धं तमोऽदर्शनात्मकं तमः प्रविशन्ति । के । येऽविद्यां विद्याया अन्याऽविद्या तां कर्मेत्यर्थः । कर्मणो[३] विद्याविरोधित्वात् । तामविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततस्तस्मादन्धात्मकात्तमसो भूय इव बहुतरमेव ते तमः प्रविशन्ति । के, कर्म हित्वा ये उ ये तु विद्यायामेव देवताज्ञान एव रता अभिरताः । तत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चय[४]कारणमाह । अन्यथा फलवदफलवतोः संनिहितयोरङ्गाङ्गितैव स्यादित्यर्थः ॥ ९ ॥

अन्यदेवेत्यादि । अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुर्वदन्ति विद्यया देवलोको विद्यया तदारोहन्तीतिश्रुतेः । अन्यदाहुरविद्यया कर्मणा क्रियते कर्मणा पितृलोक इति श्रुतेः । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम् । य आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥ १० ॥

यत एवमतो विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः । यस्तदेतदुभयं

आ० टी० रिक्तफलभावात्समुच्चयो न संभवतीत्यत आह—विद्ययेति । ननु समुच्चिचीषया निन्देति किमिति व्याख्यायते । अध्ययनविधेर्मोक्षादर्वाक्पर्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभासत्वात्प्रहाणार्थैव निन्दा किं नेष्यते तत्राऽऽह—तयोर्ज्ञानकर्मणोरिति । न फलशब्दो मोक्षे रूढो मोक्षमनिच्छतामपि[६] समीहिते फलव्यवहारदर्शनात्ततो यो देवलोकादिमुपादित्सते तस्य तदपि फलं भवत्येवेत्यर्थः ॥ ९ ॥ १० ॥ ११ ॥

१ °विद्याया अन्य° । २ । °विद्यायाः । इ । उवटाभय्यस्थाविमौ पाठौ । ३ झ. भ. ट. °णोऽविद्याविरोधाभावात् । ग. घ. ङ. च. छ. ज. ठ. एतेष्विदं नास्त्येव । ४ ग. झ. भ. ट. °ङ्गितायां जामितै° । क. ख. °ङ्गितया जामितै° । ५ ज. °त्वात्कर्मणो निन्दा मुण्डकादिषु श्रूयते प्लवा ह्येते अदृढा यज्ञरूपाः प्रहा° । ६ ज. °पि वाञ्छितस° ।

अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ॥ ११ ॥
अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते ।
ततो भूय इव ते तमो य उ संभूत्याꣳ रताः ॥ १२ ॥
अन्यदेवाऽऽहुः संभवादन्यदाहुरसंभवात् ।
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥ १३ ॥

शा० भा० सहैकेन पुरुषेणानुष्ठेयं वेद तस्यैवं समुच्चयकारिण एवैकपुरुषार्थसंबन्धः क्रमेण स्यादित्युच्यते—अविद्यया कर्मणाऽग्निहोत्रादिना मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वाऽतिक्रम्य विद्यया देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति । तद्ध्यमृतमुच्यते यद्देवतात्मगमनम् ॥ ११ ॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते—अन्धं तमः प्रविशन्ति येऽसंभूतिं संभवनं संभूतिः सा यस्य कार्यस्य सा संभूतिस्तस्या अन्याऽसंभूतिः प्रकृतिः कारणमविद्याऽव्याकृताख्या तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवान्धं तमोऽदर्शनात्मकं प्रविशन्ति । ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति य उ संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः ॥ १२ ॥

अधुनोभयोरुपासनयोः समुच्चयकारणमवयवफलभेदमाह—अन्यदेवेति । अन्यदेव पृथगेवाऽऽहुः फलं संभवात्संभूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवन्त इत्यर्थः । तथा चान्यदाहुरसंभवादसंभूतेरव्याकृतादव्याकृतोपासनाद्यदुक्तमन्धं तमः प्रविशन्तीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम धीराणां वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

आ० टी० चित्तन्त्रा माया परमेश्वरस्योपाधिः । मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुत्यन्तरप्रसिद्धाऽत्रासंभूतिशब्देनोच्यते न ब्रह्म । तस्य निर्विकारस्य साक्षात्प्रकृतित्वानुपपत्तेः । भास्कराभिमतस्तु परिणामवादस्तत्त्वालोके निरस्त एवास्माभिः । सांसारिकदुःखानुभवाभावेन च सुषुप्तिवत्प्रकृतिलयस्य पुरुषेणार्थ्यमानताऽप्युपपद्यते । फलं च कर्मोपासन इव प्रकृत्युपासनेऽपि परमेश्वर एव दास्यति । ततो जडत्वात्प्रकृतेः फलदातृत्वानुपपत्तेरुपास्यत्वानुपपत्तिरित्यपि कुचोद्यमेव ॥ १२ ॥ १३ ॥ १४ ॥

१ क. ख. °तितन्त्रत्वा° ।

संभूतिं च विनाशं च यस्तद्वेदोभय॑ँ सह ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ १४ ॥
हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् ।
तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये ॥ १५ ॥

शा०भा० यत एवमतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह—संभूतिं च विनाशं च यस्तद्वेदोभयँ सह । विनाशेन विनाशो धर्मो यस्य कार्यस्य स तेन धर्मिणाऽभेदेनोच्यते विनाश इति । तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा हिरण्यगर्भोपासनेन ह्यणिमादिप्राप्तिः फलम् । तेनानैश्वर्यादिमृत्युमतीत्यासंभूत्याऽव्याकृतोपासनयाऽमृतं प्रकृतिलयलक्षणमश्नुते । संभूतिं च विनाशं चेत्यत्रावर्णलोपेन निर्देशो द्रष्टव्यः । प्रकृतिलयफलश्रुत्यनुरोधात् ॥ १४ ॥

मानुषदैववित्तसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयान्तम् । एतावती संसारगतिः । अतः परं पूर्वोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलम् । एवं द्विप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितः । तत्र प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम् । निवृत्तिलक्षणस्य वेदार्थस्य प्रकाशनेऽत ऊर्ध्वं बृहदारण्यकमुपयुक्तं तत्रनिषेकादिश्मशानान्तं कर्म कुर्वञ्जिजीविषेद्यो विद्यया सहापरब्रह्मविषयया तदुक्तं विद्यां चाविद्यां च यस्तद्वेदोभयँ सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति । तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते—तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मडले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुष एतदुभयं सत्यं ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोऽन्तकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते हिरण्मयेन पात्रेण । हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत् । तेन पात्रेणेवापिधानभूतेन सत्यस्यैवाऽऽदित्यमण्डलस्थस्य ब्रह्मणोऽपिहितमाच्छादितं मुखं द्वारं तत्त्वं हे पूषन्नपावृण्वपसारय सत्य-

---

भा०टी० विस्तरेणोक्तमर्थजातं संक्षिप्योपसंहरति—मानुषदैववित्तसाध्यमित्यादिना । शरीरपाटवं गोभूहिरण्यादिसाधनसंपत्तिश्च मानुषं वित्तम् । दैवं वित्तं देवताज्ञान-

पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह । तेजो यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावसौ पुरुषः सोऽहमस्मि ॥ १६ ॥ वायुरनिलममृतमथेदं भस्मान्तꣳ शरीरम् ।

आ० भा० धर्माय तव सत्यस्योपासनात्सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यमथवा यथाभूतस्य धर्मस्यानुष्ठात्रे दृष्टये तव सत्यात्मन उपलब्धये ॥ १५॥

पूषन्निति । हे पूषन् । जगतः पोषणात्पूषा रविस्तथैक एव ऋषति गच्छतीत्येकर्षिः । हे एकर्षे । तथा सर्वस्य संयमनाद्यमः । हे यम । तथा रश्मीनां प्राणानां रसानां च स्वीकरणात्सूर्यः । हे सूर्य । प्रजापतेरपत्यं प्राजापत्यः । हे प्राजापत्य । व्यूह विगमय रश्मीन्स्वान् । समूह, एकी कुरु उपसंहर ते तेजस्तापकं ज्योतिः । यत्ते तव रूपं कल्याणतममत्यन्तशोभनं तत्ते तवाऽऽत्मनः प्रसादात्पश्यामि । किंचाहं न तु त्वां भृत्यवद्याचे योऽसावादित्यमण्डलस्थो व्याहृत्यवयवैः पुरुषः पुरुषाकारत्वात्पूर्णं वाऽनेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः पुरि शयनाद्वा पुरुषः सोऽहमस्मि भवामि ॥ १६ ॥

वायुरिति । अथेदानीं मम मरिष्यतो वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः । लिङ्गं चेदं ज्ञानकर्मसंस्कृतमुत्क्रामत्विति द्रष्टव्यम् । मार्गया-

भा० टी० मुत्तरग्रन्थस्य संबन्धाभिधित्सयाऽर्थविशेषमनुवदति– तत्र निषेकादीत्यादिना । तदुक्तमिति तं प्रत्युक्तं मन्त्रेण विद्यां चेत्यादिनाऽऽपेक्षिकामृतत्वं फलमित्युक्तमस्माभिरिति ॥ १९ ॥

व्याहृत्यवयव इति । तस्य भूरिति शिरः भुवं इति बाहुः सुवरिति प्रतिष्ठा पादावित्यर्थः ॥ ११ ॥ १७ ॥

१ च. सत्यधर्मस्तस्मै । यद्यप्ययमेव पाठो मूलानुसारेण समीचीन इति भाति तथाऽपि च-व्यतिरिक्तपुस्तकेषु सत्यधर्मा तस्मै, इत्येव पाठ उपलब्धः । अतः स एव शंकराचार्याभिप्रेत इति गम्यते । कुत इति चेदुच्यते–मूले सत्यधर्मायेति पदं वर्तते तत्तु भाषायां वैयाकरणरीत्या न सिध्यति किं तर्हि धर्मादनिच्केवलादिति पाणिनिसूत्रेण समासान्तानिच्प्रत्ययेन भाव्यं तथा च सत्यधर्मण इति स्यादत आचार्यैः सत्यधर्मायेत्यस्याऽऽर्षत्वप्रदर्शनार्थं भाष्येऽनिजन्तसत्यधर्मशब्दस्य प्रथमैकवचनस्य प्रदर्शितत्वादिति ज्ञेयम् । २ ज. °वः परोक्षोऽसौ शास्त्रदृष्ट्या प्रत्यक्षः पु° । ३ च °वरिति बाहू सु° ।

ॐ क्रतो स्मर कृतꣳ स्मर क्रतो स्मर कृतꣳ स्मर ॥ १७ ॥
अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् ।

शा०भा०चनसामर्थ्यात् । अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयात् । ओमिति यथोपासनमोंप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते । हे क्रतो संकल्पात्मक स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मरैतावन्तं कालं भावितं कृतमग्ने[3] स्मर यन्मया बाल्यप्रभृत्यनुष्ठितं कर्म तच्च स्मर । क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् ॥ १७ ॥

पुनरन्येन मन्त्रेण मार्गं याचते—अग्ने नयेति । हेऽग्ने नय गमय सुपथा शोभनेन मार्गेण । सुपथेति विशेषणं दक्षिणमार्गनिवृत्त्यर्थम् । निर्विण्णोऽहं दक्षिणेन मार्गेण गतागतलक्षणेनातो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय । राये धनाय कर्मफलभोगायेत्यर्थः । अस्मान्यथोक्तधर्मफलविशिष्टान्विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन् । किं च युयोधि वियोजय विनाशयास्मदस्मत्तो जुहुराणं कुटिलं वञ्चनात्मकमेनः पापम् । ततो वयं विशुद्धाः सन्त इष्टं प्राप्स्याम इत्यभिप्रायः । किंतु वयमिदानीं ते न शक्नुम परिचर्यां कर्तुं भूयिष्ठां बहुतराम् । ते तुभ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेमेत्यर्थः । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते । विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुत इति श्रुत्वा केचित्संशयं कुर्वन्ति । अतस्तन्निराकरणार्थं संक्षेपतो विचारणां करिष्यामः । तत्र तावत्किंनिमित्तः संशय इत्युच्यते । विद्याशब्देन मुख्या परमात्मविद्यैव कस्मान्न गृह्यतेऽमृतत्वं च । ननूक्तायाः परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः । सत्यम् । विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमाणकत्वात् । यथाऽविद्यानुष्ठानं विद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधावपि । यथा च न हिंस्यात्सर्वा भूतानीति शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यतेऽ-

आ०टी०मन्त्रान्पदशो व्याख्याय संक्षेपतो विचारमारभते—अविद्यया मृत्युं तीर्त्वेत्यादिना । अमृतत्वं चेति । अमृतत्वं च मुख्यमेव कस्मान्न गृह्यत इति संबन्धः । शास्त्रीययोर्ज्ञानकर्मणोर्विरोधाविरोधौ शास्त्रीयावेव ग्राह्यौ न तर्कमात्रेणेति परेणोक्ते

१ ख. ङ. च. छ. ठ. 'कम' । २ ग. ब्रह्मैव ओमित्युच्य° । ३ क. ख. घ. 'मग्ने स्म° । ४ क. ख. ग. ञ. ट. °स्तन्निर्धार° । ५ घ. ञ. ट. ड. 'स्यात्सर्वभू' । एतदन्यपुस्तकेषु सर्वा, इत्येव पाठो दृश्यते । अतः सर्वाणीत्यर्थकसर्वा, इतिपदघटितवाक्यस्य श्रुतिस्थत्वमनुमीयते ।

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥ १८ ॥

इत्युपनिषद् ॥ इति वाजसनेयसंहितोपनिषत्संपूर्णा ॥

ॐ पूर्णमदः० शिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ॥

शा० भा० ध्वरे पशुं हिंस्यादिति । एवं विद्याविद्ययोरपि स्यात् । विद्याकर्मणोश्च समुच्चयो न दूरमेते विपरीते विषूची अविद्या या च विद्येतिश्रुतेः । विद्यां चाविद्यां चेतिवचनादविरोध इति चेन्न । हेतुस्वरूपफलविरोधात् । विद्याविद्याविरोधाविरोधयोर्विकल्पासंभवात्समुच्चयविधानादविरोध एवेति चेन्न । सहसंभवानुपपत्तेः । क्रमेणैकाश्रये स्यातां विद्याविद्ये इति चेन्न । विद्योत्पत्तावविद्याया ह्यस्तत्वात्तदाश्रयेऽविद्यानुपपत्तेः । न ह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये तदुत्पन्नं तस्मिन्नेवाऽऽश्रये शीतोऽग्निरप्रकाशो वेत्यविद्याया उत्पत्तिर्नापि संशयोऽज्ञानं वा । यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यत इति शोकमोहाद्यसंभवश्रुतेः । अविद्यासंभवात्तदुपादानस्य कर्मणोऽप्य-

---

आ० टी० सिद्धान्ती शास्त्रसिद्ध एव विरोध इत्याह—न दूरमेते इति । विषूची नानागती विद्याविद्ये दूरं विपरीते अतिशयेन विरुद्धे इत्यर्थः । सहसंभवानुपपत्तेरिति । काऽनुपपत्तिः । काठके विरोधश्रवणात् । तद्गतविद्या विद्ययोर्विरोधोऽस्तु । इह त्वविरोधश्रवणादविरोधो भविष्यतीति न च वाच्यम् । विरोधाविरोधयोः सिद्धत्वेन विकल्पासंभवादुदितानुदितहोमयोर्हि पुरुषतन्त्रत्वाद्युक्तो विकल्प इत्युक्तं, तर्ह्यविरोध एवास्तु समुच्चयविधिबलादिति चेन्न । मुख्यब्रह्मविद्याविद्ययोः शुक्तिविद्याविद्ययोरिव सहसंभवानुपपत्तेः समुच्चयविधिरसिद्धः । सिद्धे समुच्चयविधौ तद्बलादविरोधावगमोऽविरोधावगमाच्च समुच्चयसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः । सहसंभवानुपपत्तावपि क्रमेणैकाश्रये विद्याविद्ये स्यातामिति चेद्यदि पूर्वमविद्या पश्चात्तु विद्येति क्रमस्तर्हीष्यत एव यदि पश्चात्तर्ह्यसंभव इत्याह—न विद्योत्पत्ताविति । पूर्वसिद्धाया अविद्यायाः प्रध्वस्तत्वादन्यस्याश्चोत्पत्तौ कारणासंभवान्मूलाभावेन भ्रमसंशयाग्रहणानामपि विदुषोऽनुपपत्तिरित्यर्थः । विद्योत्पत्तौ मा भूदविद्या कर्म तु भविष्यति विदुषोऽपि व्याख्यानभिक्षाटनादिदर्शनादित्याशङ्क्याऽऽह—अविद्यासंभवादिति । चोदनाप्रयुक्तानुष्ठानं हि कर्म ज्ञानेन सह तव समुच्चिचीर्षितं

---

१ घ. ङ. च. छ. ज. ठ. ड °ति ज्ञातेति श्रु° । २ ग. घ. च. ज. ठ. °न्न विरोधावि°।

शा० भा० नुपपत्तिमवोचाम । अमृतमश्नुत इत्यापेक्षिकममृतं विद्याशब्देन परमात्मविद्याग्रहणे हिरण्मयेनेत्यादिना द्वारमार्गादियाचनमनुपपन्नं स्यात्तस्मादुपासनया समुच्चयो न परमात्मविज्ञानेनेति यथाऽस्माभिर्व्याख्यातं एव मन्त्राणामर्थ इत्युपरम्यते ॥ १८ ॥

इति श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ वाजसनेयसंहितोपनिषद्भाष्यं संपूर्णम् ॥

॥ ॐ तत्सत् ॥

भा० टी० ब्रह्मात्मैकत्वं तु साक्षादनुभवतो न चोदना संभवति कामाभावात्कामिनो हि[२] सर्वाश्चोदनाः । ' अकामिनः क्रिया काचिद्दृश्यते नेह कस्य चित् । यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितम् ' इति स्मरणात् । विद्वच्छरीरस्थितिहेत्वविद्यालेशाश्रयकर्मशेषनिमित्तं तु विदुषो भिक्षाटनादि, न कर्म, चोदनाभावात्किंतु यावत्प्राणशरीरसंयोगभावि तत्कर्माभासं तच्च विद्वान्न स्वगतं मन्यते कर्माध्यासोपादानाविद्याया असंभवान्नैव किंचित्करोमीति प्रत्ययाच्चेति भावः । यदुक्तममृतशब्देन मुख्यमेवामृतत्वं किं न गृह्यते । विद्याशब्देन च परमात्मविद्येति तत्राऽऽह—अमृतमिति । मुख्यामृतत्वग्रहणे हिरण्मयादिमन्त्रेण द्वारमार्गयाचनमनुपपन्नं स्यात् । न तस्य प्राणा उत्क्रामन्त्यत्र ब्रह्म समश्नुत इत्यादिश्रुतेः[३] । ततो मुख्यार्थबाधाद्गौणार्थग्रहणं युक्तमित्यर्थः । यस्मादर्थान्तरं न संगच्छते तस्मादित्युपसंहारः ॥ १८ ॥

ईशाप्रभृतिभाष्यस्य शांकरस्य परात्मनः ।
मन्दोपकृतिसिद्ध्यर्थं प्रणीतं टिप्पणं स्फुटम् ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीशुद्धानन्दभगवत्पूज्यपादशिष्यभगवदानन्दज्ञानकृता वाजसनेयसंहितोपनिषद्भाष्यटीका समाप्ता ॥ ॐ तत्सत् ॥

---

१ क. ख. ग. झ. ञ. ट °स्मायथोपा° । २ घ. ङ. छ. ज. ठ. 'ते किंचित्तत्त' । ३ घ. ङ. च. ज. ड. °तेः । अतो मुख्यार्थे बा° ।

॥ अथेशावास्यभाष्यमुवटाचार्यकृतम् ॥

ॐ । समाप्तं कर्मकाण्डं ज्ञानकाण्डमिदानीं प्रस्तूयते । ईशा वास्यं तिस्रोऽनुष्टुभः । दध्यङ्ङाथर्वण ऋषिः स्वं शिष्यं पुत्रं वा गर्भाधानादिभिः संस्कारैः संस्कृतशरीरमधीतवेदमुत्पादितपुत्रं यथाशक्त्यनुष्ठितयज्ञमपापं निःस्पृहं यमनियमवन्तमतिथिपूजापनीतकिल्बिषं मुमुक्षुमुपसन्नं शिक्षयन्नाह—ईशा वास्यमिदꣳ सर्वमिति । ईश ऐश्वर्ये क्विपि तृतीयान्तस्यैतद्रूपं यदीशाऽनेन वास्यं वासनीयं ममेदमित्यनया भावनयाऽऽच्छादनीयमिदं सर्वमिति प्रत्यक्षतो निर्दिशति यत्किंच यत्किंचशब्दो भिन्नक्रमः किंच यज्जगत्यां पृथिव्यां जगज्जङ्गमादि स्वस्वामिसंबन्धालिङ्गितं स्यात्तेनानेन सर्वेण त्यक्तेन त्यक्तस्वस्वामिसंबन्धेन भोगान्भुञ्जीथा अनुभवेः । मा गृधः । गृधु अभिकाङ्क्षायामिति माऽभिकाङ्क्षय मा कृथा ममेदमिति । किं कारणं कस्य स्विद्धनं स्विदिति निपातो वितर्कवचनः । कस्य पुनरेतद्धनं न कस्यचिदपीत्यर्थ[1] इत्यभिप्रायः । सर्वाण्ययथार्थानि हि द्रव्याण्युत्पद्यन्ते । तद्यथा स्त्रियं पतिरन्यथा भुङ्क्तेऽन्यथा पुत्रोऽन्यथा प्राघूर्णकः[2] । तथा च कटककेयूरकुण्डलादीन्यलंकरणान्यन्यं चान्यं च पुरुषमुपतिष्ठमानानि दृश्यन्ते । अतः सर्वार्थस्य यः स्वस्वामिसंबन्धो ममेदमिति बुद्धिः सा त्वविद्या । निःस्पृहस्य योगेऽधिकार इति वाक्यार्थः ॥ १ ॥

निस्पृहस्यापि योगिनो ज्ञाननिमित्ते कर्मण्यधिकार इत्येतमर्थमाह—कुर्वन्नेव । कुर्वन्नेव कर्माणि मुक्तिहेतुकानीहलोके जिजीविषेज्जिजीविषेरिति पुरुषव्यत्ययः प्रत्यक्षकृतत्वान्मन्त्रस्य[3] जीवितुमिच्छेः पथ्यहितमितभक्षणेन शतं समा इत्युपलक्षणार्थम् । एवं त्वयि तवेति विभक्तिव्यत्ययः । मुक्तिरस्तीति शेषः । नान्यथेतोऽस्तीतः प्रकारादन्यथा मुक्तिर्नास्ति । एतदुक्तं भवति—यथा स्वर्गप्राप्तौ नानाभूताः प्रकाराः सन्ति न तथा मुक्तावित्यर्थः । ननु कर्मणः फलेन भवितव्यम् । अथ कथं मुक्तेः प्राप्तिरित्येतदाशङ्क्याऽऽह—न कर्म लिप्यते नरे । न हि मुक्त्यर्थं कर्म क्रियमाणं नरे मनुष्ये संबध्यते मुक्तिदानेनोपक्षीणशक्तित्वात् । तथा च बृहदारण्यकम्—तमेतं वेदानुवचनेन विविदिषन्ति ब्रह्मचर्येण तपसा श्रद्धया यज्ञेनानाशकेन चेति । विविदिषन्ति वेदितुमिच्छन्ति । अनेनैतद्दर्शयति यावदिच्छाप्रवृत्तिस्तावत्कर्मस्वधिकार इति ॥ २ ॥

---

१ क. °र्थार्थो° । २ क. प्राघुणिकः । ३ क. 'त्यक्षं कृत्वा मन्त्र' ।

इदानीं स्वर्गादिप्राप्तिहेतुभूतानि कर्माणि ये कुर्वन्ति ते निन्द्यन्ते—असुर्या नाम। असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरा असुराणां स्वभूता एवंसंज्ञकास्ते लोकाः। अन्धेन तमसाऽज्ञानलक्षणेन तमसाऽऽवृताः संवृतास्ताँल्लोकांस्ते जनाः प्रेत्य मृत्वाऽपि गच्छन्ति। ये के चाऽऽत्महनो जनाः। ये जना आत्मानं निघ्नन्ति ये स्वर्गप्राप्तिहेतुभूतानि हि नूनं कर्माणि कुर्वन्ति ते हि जनित्वा म्रियन्ते मृत्वा जायन्त एवं महतीं विनष्टिं प्राप्नुवन्ति ॥ ३ ॥

इदानीं यमनियमवतां मुमुक्षूणां यथाभूतं परं ब्रह्म आत्मत्वेनोपास्यं तदाह—उक्तं च—' अहं ब्रह्मास्मि संबुध्य इदं सर्वं च मन्मयम्। मयि विद्या समुद्दिष्टा विमुक्तिर्यन्निबन्धनी ' इति। अनेजदेकम्। त्रिष्टुब्यदनेजदचलत्तत्त्वमस्ति एकमद्वितीयं विज्ञानघनरूपेण मनसो जवीयः। मनस्तावच्छीघ्रं भवति ततोऽपि शीघ्रतरं प्रसवदानेन कारणभूतत्वात्। नैनद्देवा आप्नुवन्। नचैतत्तत्त्वं देवा अपि प्राप्तुं शक्ताः सूक्ष्मत्वात्। पूर्वमर्शत्। रिशतिर्हिंसाकर्मा पूर्वं पूर्वमपि विद्यमानं सदर्शद्रिशतीति रिशन्न रिशदर्शत्। धातोरिकारलोपश्छान्दसः। इकारलोपे कृतेऽर्शद्भवत्यविनश्यदास्तेऽनादिनिधनमित्यर्थः। तद्धावतस्तदः स्थाने यदो वृत्तिरुद्देश्यत्वात्। यच्च धावतोऽन्यान्पुरुषादीनत्येत्यतिक्रम्य गच्छति तथा तिष्ठत्सर्वत्र स्थितं सर्वगतत्वं सर्वशक्तित्वमनेन व्याख्यायते। तस्मिन्नपः। यस्मिंश्चापः कर्माणि मातरिश्वा वायुर्दधाति स्थापयति सर्वाणि कर्माणि यज्ञदानहोमादीनि समिष्टयजुषि वायौ स्थाप्यन्ते स्वाहा वातेधा इति वायुप्रतिष्ठत्वाभिधानात्। समष्टिव्यष्टिरूपो ह्यसाविति वायुरपि यस्मिन्कर्माणि स्थापयति यागहोमदानानां परमं निधानमित्यर्थः ॥ ४ ॥

एवं कारणरूपमात्मानमुद्दिश्याथेदानीं कार्यरूपेणोद्दिशति—तदेजति। अनुष्टुभस्तिस्रः। तदेव सर्वरूपेणावस्थितं सदेजति कम्पवद्भवति क्रियावद्भवति तदेव नैजति न चलति स्थावररूपावस्थितं तद्दूरे तदेव दूर आदित्यनक्षत्रादिरूपेण। तद्वन्तिके तदेव चान्तिके पृथिव्यादिरूपेण सर्वं खल्विदं ब्रह्मेत्येतद्दर्शनार्थो ग्रन्थः। तदन्तरस्य सर्वस्य प्राणिजातस्य विज्ञानघनरूपेणान्तर्मध्यत आस्ते तदु सर्वस्यास्य बाह्यतः। तदेव सर्वस्यास्य प्राणिजातस्य बाह्यतो जडरूपेण व्यवस्थितमास्ते चेतनाचेतनरूपमनन्तं सर्वगतं ब्रह्मेत्यर्थः। अस्या उपासनाया अर्चिरादिचिन्तनं नास्तीति केचिदाहुरिहैव ब्रह्मप्राप्तेः ॥ ५ ॥

यस्तु। तु शब्दो विशेषणार्थः। यः पुनः सर्वाणि भूतानि चेतनाचेतनान्यात्मन्नात्मन्येवानुपश्यति मय्येव सर्वाणि भूतान्यवस्थितानि न मद्व्यति-

---

१ क. °मू।ूइति वि°।

रिक्तान्यहमेव परं ब्रह्म सर्वभूतेषु चाऽऽत्मानमवस्थितमव्यतिरिक्तं पश्यति ततो न विचिकित्सति । एवंपश्यतो योगिनो हि सर्वाणि भूतानि परब्रह्मरूपाण्यात्मसंस्थितानि भवन्ति विज्ञानघनानन्दैकत्वादित्यतो विचारो निवर्तते ॥ ६ ॥

किंच—यस्मिन्सर्वाणि। यस्मिन्नवस्थाविशेषे सर्वाणि भूतानि चेतनाचेतनान्यात्मैवाभूत्संभवति विजानत आत्मैवेदं सर्वम् । सर्वं खल्विदं ब्रह्मेत्येवमादिवाक्यविचारणावधृतविज्ञानस्य कृतचेतसोऽवस्थाविशेषे तत्र तस्यामवस्थायां योगिनः को मोहः कः शोको न कश्चिदपीत्यभिप्रायः । शोकमोहावपरिज्ञाततत्त्वस्य भवतो नैकत्वमनुपश्यतो ध्यायतः ॥ ७ ॥

स पर्यगात् । जगती । य एवमात्मानमुपास्ते स पर्यगात्परिगच्छति शुक्रं शुक्लं विज्ञानानन्दस्वभावमचिन्त्यशक्तिमकायं न विद्यते कायः शरीरं यस्य स तथोक्तोऽव्रणं कायरहितत्वादेवास्नाविरं स्नायुरहितमकायत्वादेव शुद्धमनुपहतं सत्त्वरजस्तमोभिरपापविद्धं क्लेशकर्मविपाकाशयैरसंस्पृष्टमकायमव्रणमस्नाविरमिति पुनरुक्तान्यभ्यासे भूयांसमर्थं मन्यन्त इत्यदोषः । इत्थंभूतं ब्रह्म प्रतिपद्यते । अथाऽऽत्मोपासनायुक्तस्य फलमाह—यश्च कविः क्रान्तदर्शनो मनीषी मेधावी परिभूः सर्वतो भविता विज्ञानबलात्स्वयंभूः स्वयं ज्ञानबलाद्ब्रह्मरूपेण भविता याथातथ्यतोऽर्थान्व्यदधाद्यथास्वरूपमर्थान्विहितवान् । त्यक्तस्वस्वामिसंबन्धैरर्थैश्चेतनाचेतनैरुपभोगं कृतवान् । शाश्वतीभ्योऽनन्ताभ्यः समाभ्योऽर्थायानन्तवर्षप्राप्तये च कर्म कृतवान् । ननु कर्मजाड्याल्लोकः कर्मवानेव भवति । सत्यमात्मसंस्कारकं तु कर्म ब्रह्मभावजनकं स्यात्तस्मात्सोऽपि गच्छति शुक्रमकायं ब्रह्म ॥ ८ ॥

इत उत्तरमुपासनामन्त्राः प्रोच्यन्ते—अन्धं तमः । षडनुष्टुभो लोकायतिकाः प्रस्तूय निन्द्यन्ते येषामेतद्दर्शनं जलबुद्बुदवज्जीवा मदशक्तिवद्विज्ञानमित्यन्धं तमः प्रविशन्ति । ये चासंभूतिमुपासते मृतस्य सतः पुनः संभवो नास्त्यतः शरीरग्रहणादस्माकं मुक्तिरेव न हि विज्ञानात्मा कश्चिदनुच्छित्तिधर्माऽस्ति यो यमनियमैः संबध्यते । एवं येऽध्वानमुपासते तेऽज्ञानलक्षणं तमः प्रविशन्ति । ततोऽपि भूयो बहुतरमिवानर्थकमन्धं तमः प्रविशन्ति । ये उ उकारः कर्मोपग्रहणार्थाय ये संभूत्यामेव रता आत्मैवास्ति नान्यत्किंचिदस्तीत्यभिप्रायः । कर्मपराङ्मुखा यत्कर्मकाण्डज्ञानकाण्डयोरसंबन्ध इत्यभिप्रायः । स्वबुद्धिफल्गुतां विभावयन्त आत्मज्ञानमात्र एव रताः ॥ ९ ॥

---

१ क. °च्छिन्नध° ।

अन्यदेव । अन्यदेव फलमाहुः संभवात्संभवपरिज्ञानादन्यदाहुः फलम-संभवादसंभवपरिज्ञानात् । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां वचांसि ये धीरा नोऽस्माकं तद्ब्रह्म विचचक्षिरे व्याख्यातवन्तः ॥ १० ॥

संभूतिं च । समस्तस्य जगतः संभवैकहेतुं च परं ब्रह्म विनाशं च विनाशि च शरीरं यो योगी तदुभयमेव वेद जानाति सहैकीभूतं शरीरग्रहणेन ज्ञानोत्पत्तिहेतूनि कर्माणि करोति स विनाशेन विनाशिना शरीरेण मृत्युं तीर्त्वोत्तीर्य संभूत्याऽऽत्मज्ञानेन विज्ञानेनामृतमश्नुतेऽमृतत्वं प्राप्नोति ॥ ११ ॥

अन्धं तमः प्रविशन्ति । अज्ञानलक्षणं तमः प्रविशन्ति येऽविद्यां स्वर्गार्थानि कर्माण्युपासतेऽनुतिष्ठन्ति ततोऽपि ते भूय इव बहुतरं तमः प्रविशन्ति । ये पुनर्विद्यायामेव रता आत्मज्ञान एव त्यक्तकर्माणो रताः ॥ १२ ॥

अन्यदेव । अन्यदेव फलमाहुर्विद्याया आत्मज्ञानादन्यच्चाऽऽहुरविद्यायाः कर्मण इति शुश्रुमेत्यादि व्याख्यातम् ॥ १३ ॥

विद्यां च । आत्मज्ञानं चाविद्यां कर्म च यस्तदुभयं वेद जानाति सहैकीभूतं कर्मकाण्डं ज्ञानकाण्डस्य गुणभूतमथ कर्मकाण्डं ज्ञानकाण्डं चैकीकृत्याविद्यया कर्मकाण्डेन मृत्युं तीर्त्वोत्तीर्य कृतकृत्यो भूत्वा विद्यया ब्रह्मपरिज्ञानेनामृतत्वं मोक्षमश्नुते प्राप्नोति ॥ १४ ॥

इदानीमित्थं कृतब्रह्मोपासनस्य योगिनः शरीरपातोत्तरकाले यद्भवति तदाह—वायुरनिलम् । वायुग्रहणमिन्द्रियाण्येकादश महाभूतानि पञ्च जीवात्मैक एवं सप्तदशकलिङ्गोपलक्षणार्थं वायुः प्राणोऽनिलं स्वकीयां प्रकृतिमापद्यतेऽमृतं परं ब्रह्म तद्धि तद्विज्ञाय संपद्यते । अथेदं स्थूलशरीरं कीदृशं तदा भवति भस्मैव भवति कृतप्रयोजनकत्वात् । इदानीं योगिन आलम्बनभूतमक्षरं कथ्यते—ॐ नाम वा प्रतिमा वा ब्रह्मणः । इदानीमन्तकाले योगी स्मरणं करोति । क्रतो स्मर । योऽग्निर्ब्रह्मचर्यादारभ्य परिचरितः स [1]मनःश्वासरूपेणावस्थितः संबोध्यते । हे क्रतो मां स्मरेदानीमुपस्थितः प्रत्युपकारस्य काल इत्यभिप्रायः । क्रतुर्वा यज्ञः संबोध्यते । क्रतो स्मर*क्लिबे स्मर कृताय लोकाय स्मर कृतं स्मर मया यत्कृतं तत्स्मर ॥ १५ ॥

अग्ने नय । हेऽग्ने नय सुपथा देवयानेन मार्गेण राये मुक्तिलक्षणाय धनायास्मान्विश्वानि सर्वाणि देव दानादिगुणयुक्त वयुनानि प्रज्ञानानि विद्वाञ्ज्ञानानो युयोधि पृथक्कुरु च प्रतिबन्धकमेनः । यतो बहुतरां तव नमस्कारोक्तिं कुर्मो व्याख्याताया: पुनर्वचनं विशेषार्थम् ॥ १६ ॥

---

* क्लाबेत वा ।

---

१ क. मनसि वासनारूपेणावस्थितिः सं° ।

इदानीमादित्योपासनमाह—हिरण्मयेन पात्रेण । यद्यपि हिरण्मयरूपेण पात्रेण पिबन्त्यस्मिन्नवस्थितान्नसाम्रश्मय इति पात्रं मण्डलं मण्डलेन सत्यस्याविनाशिनः पुरुषस्यापिहितमन्तर्हितं मुखं शरीरं तथाऽपि योऽसावादित्ये पुरुषो योगिभिरुपलभ्यते सोऽसावहमस्मि । इत्थं चोपासनां कुर्यात् । ॐ खं ब्रह्म । ओमिति नामनिर्देशः । खमिति रूपनिर्देशः । आकाशरूपं ब्रह्म ध्यायेत् । आत्मत्वेनं मनोभूरचेतन आकाशश्चेतनस्त्वात्मा तद्यथा विज्ञानघनानन्दं ब्रह्म तत्राऽऽनन्दप्रतिपादकं वाक्यं तथा स यो मनुष्याणां राद्धः समृद्धो भवतीत्युपक्रम्याथ ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्द इत्यन्तम् । तथा सर्वनियन्तृत्वं दर्शयति—एतस्य वा अक्षरस्य प्रशासने गार्गीत्युपक्रम्य द्यावापृथिवी विधृते तिष्ठत इति । तथा सर्वज्ञत्वं दर्शयति—तद्यथा एतदक्षरं गार्ग्यदृष्टं द्रष्टित्यादि । तथा सत्यसंकल्पादयोऽस्य गुणाः श्रूयन्ते सत्यसंकल्पः सत्यधृतिरित्यादयः । एवं तर्हि एतद्वै तदक्षरं गार्गि यस्मिन्नाकाश ओतश्च प्रोतश्चेति सामान्याद्याकाशशब्देनैवैतद्रूपं ब्रह्माभिहितं स्यादित्ययमेव ब्रह्मवित्सिद्धान्तः ॥ १७ ॥

इति श्रीमद्वज्रटभट्टोपाध्यायात्मजसकलनिगमविचूडामणिश्रीमदुवटभट्टार्यविरचिते श्रीयजुर्वेदस्य वाजसनेयपञ्चदशभेदावान्तरमाध्यंदिनशाखासंहितामन्त्रार्थप्रकाशभाष्ये चत्वारिंशत्तमोऽध्यायः ॥ ४० ॥

समाप्तमिदमुवटार्यभाष्यम् ॥

---

१ क. 'खं सुषिरं । २ क. 'न तनुर' ।

अथ ब्रह्मानन्दकृतमीशावास्यरहस्यम् ॥

ॐ येनाऽऽत्मना परेणेशा व्याप्तं विश्वं चराचरम् ।
सत्यज्ञानस्वरूपेण तदेवाहं सदात्मकम् ॥ १ ॥
ईशा वास्यादयो मन्त्रा न कर्मप्रतिपादकाः ।
अखण्डैकरसे शुद्धे ब्रह्मण्येव समन्विताः ॥ २ ॥
कर्मसंबोधका वेदा न च ते ब्रह्मबोधकाः ।
इति मीमांसकाः प्राहुस्तन्न सत्यं कथंचन ॥ ३ ॥
अकर्मशेषमात्मानं निर्गुणं प्रकृतेः परम् ।
अशरीरं सदा मुक्तं नित्यं शुद्धस्वभावकम् ॥ ४ ॥
सत्यं ज्ञानमनन्तं च निष्कलं निष्क्रियं ध्रुवम् ।
बोधयन्ति यतः सत्यं सर्वे वेदाः षडङ्गकाः ॥ ५ ॥
अत एव हि ते मन्त्रा ब्रह्मतत्त्वप्रबोधकाः ।
ईशा ईशेन संव्याप्तं त्रैलोक्यं सचराचरम् ॥ ६ ॥
वासितं भुवनं सर्वं सत्यमेवं श्रुतिर्जगौ ।
यत्किंचित्सर्वमेवेदं जगत्यामुपलक्षणम् ॥ ७ ॥
जगद्ब्रह्मैव परमं ब्रह्मैवेदमिति श्रुतेः ।
यस्माद्ब्रह्मात्मकं सर्वं तस्मात्त्यक्तेन सर्वदा ॥ ८ ॥
पालयेथाः स्वमात्मानं स्वस्वरूपं निरञ्जनम् ।
त्यागशब्देन चाप्यत्र संन्यासः परिकीर्तितः ॥ ९ ॥
संन्यस्य सर्वकर्माणि ब्रह्मैवास्मीति भावयन् ।
रक्षणीयः स्वयं चाऽऽत्मा संसाराद्ज्ञकल्पितात् ॥ १० ॥
आत्मैवेदं जगत्सर्वं धनं नैवास्ति कस्यचित् ।
गृधिं वै धनविषयां मा कार्षीस्त्वं कथंचन ॥ ११ ॥
स्विदित्यनर्थको वाऽत्र चाऽऽक्षेपो वा भविष्यति ।
आत्मभिन्नं परं स्वं किं कस्यचिद्विद्यते धनम् ॥ १२ ॥
सुगन्धचन्दनेनैव दुर्गन्धश्छाद्यते यथा ।
नामरूपात्मकं विश्वमात्मनाऽऽच्छादितं तथा ॥ १३ ॥
तस्मादात्मैव द्रष्टव्यः श्रोतव्यः सर्वदैव हि ।
इत्येष एव वेदार्थः प्रथमो वै निरूपितः ॥ १४ ॥

॥ इत्येको मन्त्रो व्याख्यातः ॥

सर्वकर्माणि संन्यस्य मन्तव्यः परमेश्वरः ।
तदशक्तस्य कर्माणि कर्तव्यानि श्रुतिर्जगौ ॥ १ ॥
अग्निहोत्रादिकर्माणि व्यवहारान्सदा नरः ।
कुर्वञ्जीवितुमिच्छेद्वै शतं संवत्सरान्स्वयम् ॥ २ ॥
तावद्धि पुरुषस्याऽऽयुः शतायुरिति च श्रुतेः ।
एवंप्रकारे तु त्वयि नरमात्राभिमानिनि ॥ ३ ॥
प्रकारान्तरं नैवास्ति न कर्म लिप्यते यथा ।
ईश्वरार्पणबुद्ध्या तु कर्म कुर्वन्न लिप्यते ॥ ४ ॥
प्रसीदति परो ह्यात्मा शुद्धान्तःकरणे स्वयम् ।
इति द्वितीयमन्त्रार्थः सम्यगेव निरूपितः ॥ ५ ॥

॥ इति द्वितीयो मन्त्रो व्याख्यातः ॥

अविवेकात्तु संसारो विवेकान्नैव विद्यते ।
अविवेकनिवृत्त्यर्थं मन्त्रोऽयं संप्रवर्तते ॥ १ ॥
आत्मज्ञानमुपेक्ष्याथ देवा ये भोगलम्पटाः ।
असुरा एव ते ज्ञेया आत्मधर्मबहिष्कृताः ॥ २ ॥
येऽन्यथा सन्तमात्मानमकर्तारं स्वयंप्रभम् ।
कर्ता भोक्तेति मन्यन्ते त एवाऽऽत्महनो जनाः ॥ ३ ॥
स्वात्मनः स्वस्वरूपस्य तिरस्करणहेतुतः ।
अदर्शनात्मकेनैव चान्धेन तमसाऽऽवृताः ॥ ४ ॥
प्रेत्य देहं परित्यज्य संसरन्ति पुनः पुनः ।
ये के च परमात्मानं न जानन्ति परात्परम् ॥ ५ ॥
योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चौरेणाऽऽत्मापहारिणा ॥ ६ ॥
इति वाक्यं श्रुतिः शास्ति सत्यमेतन्न संशयः ।
अपि गच्छन्ति पाठे तु ज्ञानाभावे न चान्यथा ॥ ७ ॥
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ।
स्वात्मानं परमं ज्ञात्वा मुच्यते जन्मबन्धनात् ॥ ८ ॥

॥ इति तृतीयो मन्त्रो व्याख्यातः ॥

कीदृशं तत्परं तत्त्वं पूर्वमन्त्रेण कीर्तितम् ।
तदर्थप्रतिपत्त्यर्थं चतुर्थोऽयं प्रवर्तते ॥ १ ॥

अनेजत्परमं तत्त्वं स्वतश्चलनवर्जितम् ।
एजृ कम्पन इति च धात्वर्थोऽपि तथाविधः ॥ २ ॥
अचलं सत्परं ब्रह्म नित्यमुक्तस्वभावकम् ।
एकमेवाद्वितीयं च सत्यज्ञानस्वरूपकम् ॥ ३ ॥
संकल्पलक्षणाच्चास्मान्मनसो वेगवत्तरम् ।
नैनत्तत्वं प्राप्नुवन्तो देवा ये चक्षुरादयः ॥ ४ ॥
पूर्वमेव हि संव्याप्तं व्योमवन्निर्मलं परम् ।
तद्धावतोऽन्यान्वेगेन सर्वान्व्याप्यैव तिष्ठति ॥ ५ ॥
तस्मिंस्तिष्ठति पूर्णेऽस्मिन्परे ब्रह्मणि केवले ।
अपः कर्माणि सर्वाणि मातरिश्वा दधाति च ॥ ६ ॥
अन्तरिक्षे[1] स्वयं[2] याति सूत्रात्मा पवनः स्वयम् ।
कर्म चैतत्फलं चैव धारयत्येव सर्वदा ॥ ७ ॥
इति संक्षेपतो मन्त्रश्चतुर्थोऽपि समापितः ।
प्रसीदतु परो देवः सर्वभूतगुहाशयः ॥ ८ ॥

॥ इति चतुर्थो मन्त्रो व्याख्यातः ॥

न मन्त्राणां जामितादिदोषः कश्चन विद्यते ।
उक्तमेव वदत्यर्थं ब्रह्मतत्त्वप्रकाशकम् ॥ १ ॥
दुर्विज्ञेयं परं ब्रह्म सत्यज्ञानमनन्तकम् ।
निष्कलं[3] निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ॥ २ ॥
अमृतस्य परं सेतुं दग्धेन्धनमिवानलम् ।
इति वाक्यं यतः शास्ति ब्रह्म सत्यं पुनातु माम् ॥ ३ ॥
तदेजति परं ब्रह्म ब्रह्मविष्णुशिवात्मकम् ।
साकारं मायया भाति निराकारं तु वास्तवम् ॥ ४ ॥
उपाधिचलनेनैव चलनं तु विभाव्यते ।
तन्नैजति परं ब्रह्म निर्गुणं प्रकृतेः परम् ॥ ५ ॥
तच्च दूरे परं ब्रह्म सर्वदैवाविवेकिनाम् ।
अप्राप्यत्वात्परं ब्रह्म वर्षकोटिशतैरपि ॥ ६ ॥
तदेव ह्यन्तिके ब्रह्म स्वात्मरूपं विवेकिनाम् ।
तद्बाह्याभ्यन्तरे ब्रह्म कार्यकारणवस्तुनः ॥ ७ ॥

---

१ ग. °क्षे श्वसितीति । २ ख. स्वपितीति । ३ घ. निष्कम्पं नि° ।

विश्वातीतं परं ब्रह्म विश्वस्याभ्यन्तरे स्थितम् ।
नीरूपं सर्वगं ज्ञात्वा मुच्यते जन्मबन्धनात् ॥ ८ ॥
इति पञ्चममन्त्रोऽयं समासेन निरूपितः ।
मायातीतं परं शुद्धं रहस्यं च प्रकीर्तितम् ॥ ९ ॥
॥ इति पञ्चमो मन्त्रो व्याख्यातः ॥

तद्ब्रह्म परमं शुद्धं कर्मणा नैव लभ्यते ।
कर्मत्यागी परं ब्रह्म प्राप्य सम्यक्प्रमुच्यते ॥ १ ॥
कर्मणा लभ्यते ब्रह्म ज्ञानान्नैव तदाप्यते ।
इति मीमांसकाः प्राहुस्तेषां पक्षो निरस्यते ॥ २ ॥
यस्तु सर्वाणि भूतानि परिव्राट्स्वयमेव हि ।
तानि सर्वाणि भूतानि स्वस्मिन्नेव प्रपश्यति ॥ ३ ॥
सर्वभूतेषु चाऽऽत्मानं सर्वभूतगुहाशयम् ।
तस्मादेव तु विज्ञानान्न चैव विचिकित्सति ॥ ४ ॥
स्वस्वरूपपरिज्ञानात्संदेहं न करोत्ययम् ।
माध्यंदिनस्य पाठे तु व्याख्यानं परिकीर्तितम्[1] ॥ ५ ॥
घृणा दया जुगुप्सा वा जायते भेददर्शिनः ।
न तु निर्भेदमद्वैतमात्मैकत्वं प्रपश्यतः ॥ ६ ॥
इति षष्ठोऽपि मन्त्रोऽयं समासेन मयोदितः ।
अनेन प्रीयतां देवः सर्वभूतगुहाशयः ॥ ७ ॥
॥ इति षष्ठो मन्त्रो व्याख्यातः ॥
परिव्राडेव तद्वेत्ति स्वात्मानं प्रकृतेः परम् ।
इति प्रदर्शनार्थं तु सप्तमोऽयं प्रवर्तते ॥ १ ॥
यश्च संपश्यते ज्ञानं स वेत्ति परमेश्वरम् ।
इति शङ्कानिवृत्त्यर्थं तुशब्दोऽयं प्रवर्तते ॥ २ ॥
यस्मिन्ब्रह्मस्वरूपे तु निर्विकल्पे परेऽव्यये ।
सर्वाण्यात्मैव संवृत्तं ब्रह्मतत्त्वं विजानतः ॥ ३ ॥
ब्रह्मैव सकलं विश्वमहमस्मीति तत्पदम् ।
पद्यते गम्यते नित्यं स्वस्वरूपं स्वयंप्रभम् ॥ ४ ॥
शोकमोहादिसंबन्धस्तास्मिन्नैव तु विद्यते ।
अप्राणो ह्यमनाः शुभ्र इत्यादिश्रुतिशासनात् ॥ ५ ॥

---

१ ग. °मंठैर्न च ल°।

अविद्याकार्यनिर्मुक्ते संविद्रूपे परात्मनि ।
शोकमोहादिसंबन्धः कथं ब्रह्मणि भाव्यते ॥ ६ ॥
इत्ययं सप्तमो मन्त्रः स्वरूपप्रतिपादकः ।
सोऽहमस्मि स एवाहं ब्रह्मैवास्मीति वाक्यतः ॥ ७ ॥

॥ इति सप्तमो मन्त्रो व्याख्यातः ॥

ब्रह्मा[1]ऽऽत्मा सकलं विश्वं तस्मिन्विश्वं प्रतिष्ठितम् ।
जीवाज्ञानवशादेव चाष्टमोऽयं प्रवर्तते ॥ १ ॥
आत्मानं सर्वगं शुद्धं निरूपयितुमञ्जसा ।
आप्नोति सकलं कार्यं तस्मादात्मेति गीयते ॥ २ ॥
स पर्यगात्परो ह्यात्मा सर्वं व्याप्य व्यवस्थितः ।
यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥ ३ ॥
अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
इति मन्त्रो यतः शास्ति तस्माद्भेदो न विद्यते ॥ ४ ॥
निर्विभागः स्वयंज्योतिरात्मैव सकलं जगत् ।
[2]शुक्लज्योतिःस्वभावोऽयं नित्यचिन्मात्रविग्रहः ॥ ५ ॥
लिङ्गदेहविनिर्मुक्तः सर्वभूतगुहाशयः ।
एकीभूतः स्वयं चाऽऽत्मा सर्वं व्याप्य प्रतिष्ठितः ॥ ६ ॥
तमात्मानं परं शान्तं देहत्रयविवर्जितम् ।
निरिन्द्रियं परं ज्ञात्वा मुच्यते सर्वबन्धनात् ॥ ७ ॥
मायापाशविनिर्मुक्तं धर्माधर्मविवर्जितम् ।
मनसोऽपि नियन्तारं सर्वसाक्षिणमव्ययम् ॥ ८ ॥
उपर्युपरि सर्वेषां भवितारं स्वयंभुवम् ।
विभुं सर्वात्मकं ज्ञात्वा मुक्त एव भवत्यसौ ॥ ९ ॥
अथ वा स परो देवः सर्वव्यापी निरञ्जनः ।
सर्वगः सकलं व्याप्य स्वयमेव व्यवस्थितः ॥ १० ॥
व्यवहारेऽपि शुद्धोऽसौ देहद्वयविवर्जितः ।
बीजधर्मविनिर्मुक्तो नियन्ता सर्वदेहिनाम् ॥ ११ ॥
परिभवति कार्याणि परिभूः स्वयमेव हि ।
स्वातन्त्र्येण भवतीति स्वयंभूः पारविश्वदृक् ॥ १२ ॥

---

१ ख. °ह्यात्मस° । २ क. ग. शुक्रं ज्यो°

याथातथ्यत एवायं कर्तव्यार्थान्स्वयं प्रभुः ।
शाश्वतीभ्यः समाभ्यश्च प्रजापतिभ्य एव हि ॥ १३ ॥
प्रजाभ्यश्च विभज्यैव दत्तवान्परमेश्वरः ।
तदेवं परमात्मानं नित्यमुक्तस्वभावकम् ॥ १४ ॥
सोऽहमस्मीति विज्ञाय मुक्त एव भवत्ययम् ।
इत्येवमष्टमो मन्त्रः सम्यगर्थनिरूपकः ॥ १५ ॥
समाप्तः सर्वगो ह्यात्मा नित्यं सर्वस्वभावकः ।
सोऽहमस्मीति विज्ञाय मुच्यते सर्वतोभयात् ॥ १६ ॥

॥ इत्यष्टमो मन्त्रो व्याख्यातः ॥

संन्यस्य सर्वकर्माणि ज्ञातव्यः परमेश्वरः ।
इति प्रथमो वेदार्थः सम्यगेव प्रदर्शितः ॥ १ ॥
अग्निहोत्रादिकर्माणि तदशक्तेन सर्वदा ।
कर्तव्यानि द्वितीयोऽपि वेदार्थोऽयं प्रदर्शितः ॥ २ ॥
विरोधं दर्शयित्वा तु तयोरेव हि मन्त्रयोः ।
बृहदारण्यके शास्त्रे व्यवहारोऽपि दर्शितः ॥ ३ ॥
कामुकस्य तु संसारो निष्कामस्य परा गतिः ।
इति प्रदर्शनार्थस्तु नवमोऽयं प्रवर्तते ॥ ४ ॥
अन्धं मूढं तमो यान्ति ये मायां समुपासते ।
विरक्ता अपि संसारान्नैष्काम्यं ये विदुर्नराः ॥ ५ ॥
असंभूतिवचसाऽत्र मायातत्त्वं प्रकथ्यते ।
मायातत्त्वात्तु संसारो जायते सर्वदेहिनाम् ॥ ६ ॥
भूयः पुनस्तमो यान्ति संभूत्यां ये रता नराः ।
संभवनं च संभूतिर्लिङ्गं सप्तदशात्मकम् ॥ ७ ॥
मायाबीजस्य कार्यं तत्सूत्रात्मानं प्रचक्षते ।
कार्यकारणनिर्मुक्तं ज्ञात्वाऽऽत्मानं विमुच्यते ॥ ८ ॥
नवमोऽपि समाप्तोऽयं संक्षेपार्थप्रदर्शकः ।
समुच्चयचिकीर्षार्थं दशमोऽपि प्रवर्तते ॥ ९ ॥

॥ इति नवमो मन्त्रो व्याख्यातः ॥

संभवादन्यदेवाऽऽहुः फलं कार्यस्य चिन्तनात् ।
कारणाद्बीजरूपस्य चिन्तनादन्यदेव हि ॥ १ ॥

इत्याहुर्वेदविद्वांसः फलभेदं विचक्षणाः ।
श्रुतवन्तो वयं पूर्वमाचार्याणां महात्मनाम् ॥ २ ॥
व्याख्यातवन्तो येऽस्मभ्यं गुरवस्तत्त्वदर्शिनः ।
तेषामेव हि तद्वाक्यं फलभेदप्रदर्शकम् ॥ ३ ॥
मतिभेदात्तु भेदोऽयं दर्शितो न तु वस्तुतः ।
धीराणां परमं वाक्यं ब्रह्मतत्त्वप्रदर्शकम् ॥ ४ ॥
सत्यं ज्ञानमनन्तं च ब्रह्मैव परमं ध्रुवम् ।
इत्थं दशममन्त्रोऽपि समासेन समापितः ॥ ५ ॥

॥ इति दशमो मन्त्रो व्याख्यातः ॥

संभूतिं कार्यरूपं च विनाशं कारणात्मकम् ।
एकादशोऽपि मन्त्रोऽयं तयोरेकत्वदर्शकः ॥ १ ॥
कार्यकारणयोरैक्यं यो वेद सततं नरः ।
विनाशेन मृत्युं तीर्त्वा संभूत्याऽमृतमश्नुते ॥ २ ॥
यस्मिन्विनश्यति कार्यं विनाशं कारणं परम् ।
मायाबीजं च तत्प्रोक्तं चैतन्यकवलीकृतम् ॥ ३ ॥
तयोपासनया मृत्युं तीर्त्वा स्वाभाविकं तमः ॥
हिरण्यगर्भोपासनया संभूत्या मुच्यते बुधः ॥ ४ ॥
आत्मविद्यावधिः सोऽथ परं कारणमुच्यते ।
साक्षी चेता जगद्बीजमन्तर्यामीति च श्रुतौ ॥ ५ ॥
कार्यकारणरूपं च ब्रह्मैव केवलं शिवम् ।
कार्यकारणनिर्मुक्तं परं ज्ञात्वा विमुच्यते ॥ ६ ॥
इत्येकादशमन्त्रोऽपि समाप्तस्तत्त्वबोधकः ।
ब्रह्मैव परमं शुद्धं ब्रह्मैवाहं सदद्वयम्[1] ॥ ७ ॥

॥ इत्येकादशो मन्त्रो व्याख्यातः ॥

कर्मणा बध्यते जन्तुर्विद्यया च विमुच्यते ।
इति प्रदर्शनार्थं तु द्वादशोऽयं प्रवर्तते ॥ १ ॥
अन्धं मूढं तमो यान्ति केवलं कर्मचिन्तकाः ।
देवतोपासका ये च तेऽपि यान्ति पुनस्तमः ॥ २ ॥
एकैकोपासनां भिन्नां निन्दयित्वा पुनः पुनः ।
एकेनैव द्वयं सेव्यं श्रुतिराह पुनः स्वयम् ॥ ३ ॥

---

१ ख. सदाऽद्व० ।

इति द्वादशमन्त्रोऽपि समासार्थप्रदर्शकः ।
समापितः स्वयं शुद्धं ब्रह्मैवाहं सदद्वयम् ॥ ४ ॥

॥ इति द्वादशो मन्त्रो व्याख्यातः ॥

एकत्वं तु न चैवास्ति रविशार्वरयोरिव ।
पृथगेव दर्शयितुं कर्मविज्ञानजं फलम् ॥ १ ॥
त्रयोदशोऽपि मन्त्रोऽयं स्वयमेव प्रवर्तते ।
विद्याया अन्यदेवाऽऽहुः पृथगेव फलं बुधाः ॥ २ ॥
अविद्याया अन्यदाहुरग्निहोत्रादिकर्मणः ।
श्रुतवन्तो वयं वाक्यं धीराणां तत्त्वदर्शिनाम् ॥ ३ ॥
व्याख्यातवन्तो येऽस्मभ्यं गुरवो ब्रह्मतत्पराः ।
तेषां वाक्यं ब्रह्मतत्त्वबोधकं परमं ध्रुवम् ॥ ४ ॥
इति त्रयोदशो मन्त्रः पृथगर्थप्रदर्शकः ।
बोधको ब्रह्मतत्त्वस्य समासेन निरूपितः ॥ ५ ॥

॥ इति त्रयोदशो मन्त्रो व्याख्यातः ॥

पृथक्फलं विद्यते चेदग्निहोत्रादिकर्मणाम् ।
उपासनफलं चैव कथं वा क्रियते तदा ॥ १ ॥
प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते ।
फलं सम्यक्प्रवक्तव्यं कैवल्यप्रतिपत्तये ॥ २ ॥
अग्निहोत्रं च विद्यां च देवतोपासनं परम् ।
एकीकृत्य चिन्तितं चेत्कैवल्यं लभते पदम् ॥ ३ ॥
पद्यते गम्यते चेति स्वस्वरूपं निरञ्जनम् ।
द्विविधं तत्परं ब्रह्म सगुणं निर्गुणात्मकम् ॥ ४ ॥
निर्गुणं वास्तवं ब्रह्म सगुणं परिकल्पितम् ।
कर्म विद्यां चैकीकृत्य यस्तद्वेदोभयं बुधः ॥ ५ ॥
मृत्युं तीर्त्वा कर्मणा तु विद्ययाऽमृतमश्नुते ।
हिरण्यगर्भमात्मानं ब्रह्मलोकनिवासिनम् ॥ ६ ॥
तं प्राप्य तेन सार्धं तु परं ब्रह्माधिगच्छति ।
इत्थं चतुर्दशो मन्त्रः संक्षेपेण निरूपितः ॥ ७ ॥

॥ इति चतुर्दशो मन्त्रो व्याख्यातः ॥

उपासकफलं[1] वक्तुं मन्त्रः पञ्चदशः स्वयम् ।
शाश्वतं कार्यरूपं च कृपया तत्परं पुनः ॥ १ ॥
तत्रैवोपासकः साक्षाद्वायुं प्रार्थयते स्वयम् ।
सूत्रात्मानं परं दिव्यममृतं शिवमव्ययम् ॥ २ ॥
प्राणो गच्छतु मे शीघ्रं लयं गच्छतु निश्चलम् ।
शाश्वतं शिवमव्यक्तं ब्रह्मैवाहं सनातनम् ॥ ३ ॥
अथेदानीं शरीरं मे भस्मी भवतु वै ध्रुवम् ।
अमृतात्मस्वरूपस्य ब्रह्मीभूतस्य केवलम् ॥ ४ ॥
क्रतो स्मर निर्बीजाय कृतं कर्म शुभाशुभम् ।
द्विरावृत्तिरादरार्था क्रतो संकल्प हे स्मर ॥ ५ ॥
कृतमुपासनं कर्म फलं दातुं च शाश्वतम् ।
सत्यं तत्परमं ब्रह्म नित्यमव्ययमेत्ययम् ।
इति पञ्चदशो मन्त्रः समाप्तः स्वार्थसाधकः ॥ ६ ॥

॥ इति पञ्चदशो मन्त्रो व्याख्यातः ॥

उपासकेन गन्तव्यं केन मार्गेण सांप्रतम् ।
इति प्रदर्शनार्थं तु षोडशोऽयं प्रवर्तते ॥ १ ॥
मन्त्रो मार्गं दर्शयितुं ब्रह्मलोकगतिं प्रति ।
अग्ने प्रकाशरूपोऽसि शोभनेन पथा नय ॥ २ ॥
प्रापयास्मान्महाभाग ब्रह्मलोकमनामयम् ।
विश्वानि देव सर्वाणि ज्ञानानि वयुनानि च ॥ ३ ॥
विद्वाञ्ज्ञानासि सर्वज्ञ प्रसीद वरदो भव ।
वियोजय जुहुराणं कौटिल्यं पातकं मम ॥ ४ ॥
अन्तकाले चरीकर्तुमशक्तास्ते परेश्वर ।
नमउक्तिं विधेम त्वं प्रसीद परमेश्वर ॥ ५ ॥
षोडशोऽपि च मन्त्रोऽयं संक्षेपेण समापितः ।
निष्कलं ब्रह्म परमं तदेवाहं सदोमिति ॥ ६ ॥

॥ इति षोडशो मन्त्रो व्याख्यातः ॥

द्वारं विना कथं गन्तुं शक्यते ब्रह्म तत्परम् ।
सत्यलोकस्य चाऽऽत्मानं सूत्रभूतं सनातनम् ॥ १ ॥

---

१ ग. °सनफ° ।

तस्मात्साधनद्वारं मन्त्रः सप्तदशः स्वयम् ।
प्रवर्तते प्रार्थयितुमादित्यं सर्वरूपकम् ॥ २ ॥
हिरण्मयेन पात्रेण सत्यस्य ब्रह्मणो मुखम् ।
तीक्ष्णेन ज्योतिषा व्याप्तं गन्तुं नैव तु शक्यते ॥ ३ ॥
रश्मिजालं निराकृत्य द्वारं मे देहि भास्कर ।
सत्यलोकस्य सत्याख्यं ब्रह्म गन्तुं च मे प्रभो ॥ ४ ॥
भृत्यवत्त्वां नैव याचे स्वरूपोऽहं तवाच्युत ।
अहं ब्रह्मैव परमं भवान्ब्रह्मैव केवलम् ॥ ५ ॥
आवयोरेकता नित्यं सत्यमेतद्ब्रवीम्यहम् ।
पूर्णत्वात्पुरुषश्चायं योऽसावादित्यमण्डले ॥ ६ ॥
देहेन्द्रियधियां साक्षी सोऽसावहमिति स्वयम् ।
ब्रह्म वै परमं शुद्धं ब्रह्मैवाहं सदद्वयम् ॥ ७ ॥
संपूर्णो निखिलस्यास्य कार्यकारणवस्तुनः ।
पुरुषोऽयं भवेदात्मा पूर्णत्वाद्योऽद्वयात्मकः ॥ ८ ॥
इति वाक्यं यतः शास्ति सत्यं ब्रह्मैव केवलम् ।
ब्रह्म सत्यं परं ज्ञात्वा मुच्यते जन्मबन्धनात् ॥ ९ ॥
इति सप्तदशो मन्त्रः समासेन निरूपितः ।
सत्यस्य परमं सत्यं ब्रह्म सत्यं च पातु माम् ॥ १० ॥
ईशावास्यरहस्यं तु ब्रह्मानन्दविनिर्मितम् ।
ब्रह्मानन्दमयं ज्ञात्वा मुच्यते सर्वबन्धनात् ॥ ११ ॥
ब्रह्मैव सत्यं परमं विशुद्धं सर्वान्तरस्थं सदसद्विहीनम् ।
निरञ्जनं निष्कलमद्वितीयं तदेव चाहं सततं विमुक्तः ॥ १२ ॥

॥ इति सप्तदशो मन्त्रो व्याख्यातः ॥

ईशावास्यरहस्यं च शुक्रतीर्थोत्तमे शुभे ।
रामानन्दसरस्वत्या लिखितं स्वात्मलब्धये ॥

इति श्रीब्रह्मानन्दसरस्वतीकृतमीशावास्यरहस्यं समाप्तम् ॥

अथ शंकरानन्दकृतेशावास्यदीपिका ॥

ॐ ईशावास्यादयो मन्त्रा विनियुक्ता न कर्मणि ।
प्रमाणाभावतस्तेषां कुर्वे व्याख्यामकर्मगाम्[1] ॥ १ ॥

ईशा ईष्ट इतीट् ईश्वर आनन्दात्मा तेन वास्यमाच्छादनीयं निवासयोग्यं वेदं विविधप्रत्ययगम्यं सर्वं निखिलम् । सर्वशब्दार्थमाह—यत्किंच यत्किंचिद्भूतभौतिकं जगत्यां ब्रह्माण्डकटाहभूमौ जगच्चेतनात्मकमीश्वर एवेदमिति बुद्धिः करणीयेत्यर्थः । तद्बुद्ध्युत्पादे साधनमाह—तेन जगता त्यक्तेन तद्बुद्ध्या गृहीतेन भुञ्जीथा ईश्वरतत्त्वसाक्षात्कारलक्षणं भोजनं कुर्याः । जगद्बुद्धेरनुत्पादे सर्वसङ्गपरित्यागलक्षणमुपायमाह—मा गृधः, माभिलाषं कार्षीः । अभिलाषो हि विषयघटितो विषयाश्चानेके तेषामन्यतमपरित्याग उपायो मा भूदित्येतदर्थमाह—कस्यस्विल्लोकद्वयस्यापि तत्र हेतुर्धनमभिलाषस्य विषयो यः कश्चन धर्मोऽपि धनरूपः । धनं च हिरण्यादिकं सर्वक्लेशबीजं प्रसिद्धम् ॥ १ ॥

यस्त्वमुमुक्षुर्धनाभिलाषी नास्य त्यागेऽधिकार इति तं प्रति सकरुणा मातेव श्रुतिराह–कुर्वन्नेवेति । स्पष्टम् । इहास्मिन्कर्माधिकारे लोके कर्माणि नित्यान्यग्निहोत्रादीन्यन्यानि च जिजीविषेज्जीवितुमिच्छेच्छतं समाः । धने वैराग्याभावे यावदायुः शतसंवत्सरं न्यूनमधिकं वा । कर्मणां करणे कारणमाह–एवं शतसंवत्सरं यथोक्तकर्मानुष्ठानवति त्वय्यधिकारिणि वर्तमाने धनविषयेऽपि वैराग्यं भविष्यतीति शेषः । ननु यथा मुमुक्षोः कर्मपरित्यागेनैव पुरुषार्थसिद्धिस्तथाऽन्यस्यापि स्यादित्यत आह—नान्यथेतोऽस्ति । इतः स्ववर्णाश्रमोचितयथोक्तानुष्ठानादन्यप्रकारेण मुमुक्षोरिव पुरुषार्थो नास्ति । नानुतिष्ठामि विपरीतेनानुतिष्ठामीत्यध्यासेन प्रसभमुपचीयमानदुरितत्वात्तदनुष्ठाने च तन्न भवतीत्याह—नकर्म विपरीतानुष्ठानरूपं लिप्यते न संबध्यते । कस्मिन्नरे यथोक्तकर्मानुष्ठानवति त्रैवर्णिकेऽधिकारिणि त्वयि । सूत्रभूतावेतौ मन्त्रौ । शिष्टमेतयोरेव व्याख्यानम् ॥ २ ॥

मा गृध इत्यादेर्व्याख्यानमनेन मन्त्रेण धनाभिलाषवतां कष्टसंसारप्राप्तिरुच्यते—असुर्या नामासुरसंबन्धिनः प्रसिद्धास्ते धनाभिलाषवतामात्मज्ञानशून्यानां ये श्वसूकरादिदेहरूपास्ते लोकाः कर्मफलरूपा देहविशेषा अन्धेन

---

[1] ग. °र्मणाम् ।

तमसा क्लेशचतुष्टयानुविद्धेन पञ्चमेनान्धतामिस्रेणाहंममाभिनिवेशरूपेणाऽऽवृताः संवृताः। तानुक्ताँल्लोकास्ते धनाभिलाषेणेश्वरज्ञानशून्याः प्रेत्येदमधिकारिशरीरं परित्यज्याभिगच्छन्ति सर्वतः प्राप्नुवन्ति। तच्छब्दार्थमाह—ये के चाऽऽत्मघ्न आत्मानमीशं सर्वतः परिपूर्णं चिदानन्दं परेण धनरूपेण घ्नन्ति तिरस्कुर्वन्ति ये त आत्महन इदं सर्वमहमेवेति ज्ञानशून्या इत्यर्थः। जनाः संसारचक्रे पुनः पुनः प्रादुर्भाववन्तः ॥ ३ ॥

ईट्शब्दार्थमाह—अनेजत्। कम्पनमकुर्वदनेन वायुप्राणौ निराकृतौ। एकं देहादिभेदेन भेदशून्यमिदमित्थं चेत्स्यान्मनसा प्राप्यमित्यत आह–मनसो जवीयो मनसोऽपि वेगवत्तरम्। मनसा साक्षादनाप्यानामपि रूपादीनां चक्षुरादिभिराप्यत्वदर्शनादिदमपि तथाऽस्त्वित्यत आह–नैनदिति। नैनदीश्वरस्वरूपं देवाश्चक्षुरादय आप्नुवन्नधिगतवन्तो मनसेन्द्रियैश्चानाप्यत्वेन। परिच्छेदशङ्कां प्राप्तां वारयति—पूर्वं प्रथममर्शद्गतवत्सर्वतो गतमित्यर्थः। सर्वतोगतत्वे हेतुः—तदीश्वरस्वरूपं धावतो गतिं कुर्वतोऽन्यान्कालवाय्वादीनत्येत्यतीत्य गच्छति। तर्ह्येष्वेव किंचिदतिवेगवदित्यत आह–तिष्ठद्गतिमकुर्वत्। इदानीमसाधारणलक्षणमाह–तस्मिन्सर्वगत एकस्मिन्मनसेन्द्रियैश्चाप्राप्ये सर्वाधिके गतिशून्ये निश्चलेऽपः कर्माण्यध्यात्माद्याश्रयाणि शरीरारम्भादिकारणानि मातरिश्वा मातर्याकाशेऽव्याकृते श्वसिति सत्तां प्राप्नोति सूत्रात्मा स जीवसंघो[1] यः स मातरिश्वा प्रथमं कार्यं ज्ञानक्रियाशक्तिभि[2]रित्यर्थः। दधाति विधारयति सूत्रात्मजनकत्वेन जगत्कारणं भवतीत्यर्थः ॥ ४ ॥

एवं मूर्तामूर्तविलक्षणमीशशब्दार्थमुक्त्वा प्रथमपादार्थमाह—तदीशस्वरूपमेजति मूर्तरूपेण कम्पते तदीश्वरस्वरूपं नैजति नैजत्याकाशादिरूपेण तदीशस्वरूपं दूर एकस्य मूर्तस्यापेक्षया मूर्तान्तरेण रूपेण तदु ईश्वरस्वरूपमेवान्तिके सर्वस्यापि समीपे। तदीश्वरस्वरूपमन्तर्मध्येऽस्य जगतः सर्वस्य निखिलस्य तदु सर्वस्यास्य व्याख्यातं बाह्यतो बहिरपि ॥ ५ ॥

तृतीयपादार्थमाह—यस्तु। तुशब्दो जगद्दृष्टिनिवारणार्थः। यो विरक्तो मुमुक्षुः सर्वाणि भूतानि स्पष्टम्। आत्मन्येवास्मिन्नीशस्वरूप आनन्दात्मनि स्वयंज्योतिष्येव। आत्मेश्वरयोर्भेदनिवारणार्थ एवकारोऽनुपश्यतीशा वास्यमित्यादिश्रवणानन्तरं मय्येवाध्यस्तानि सर्वाणि भूतानीमानीति साक्षात्करोति।

१ क. °वसर्गो यः। २ ग. °क्तिरित्य°।

भूतान्यध्यस्तानि निरात्मकान्यात्मनोऽत्यन्तभिन्नानीति शङ्कां वारयति—सर्वभूतेषु चाऽऽत्मानमात्मानमपि सर्वेषु भूतेषु वस्तुतस्त्वहमेवैतेषु भूतेष्ववस्थितो न मत्तोऽन्यान्येतानि भूतानीत्यर्थः। चकारोऽनुपश्यतीति क्रियासमुच्चयार्थः। तद्दर्शनफलमाह—तत आनन्दात्मा चिदेकरसोऽहमस्मि सर्वाभिन्न इति विज्ञानानन्तरं न विजुगुप्सते। किमपि न निन्दति स्तुतिनिन्दाशून्यो भवतीत्यर्थः ॥ ६ ॥

अत्रोपपत्तिमाह—यस्मिन्नीश्वरस्वरूप आनन्दात्मनि सर्वाणि भूतानि। स्पष्टम्। आत्मैवाभूत्स्वं स्वं रूपं परित्यज्य कल्पितमकल्पितमानन्दात्मस्वरूपमेवाभूत्। भूतानामानन्दात्मभवने कारणमाह—विजानत ईडात्मकमिदमहमस्मीति विज्ञानवतस्तत्रेडात्मविज्ञातृस्वरूपे देशकालवस्तुपरिच्छेदशून्ये। क आक्षेपे। द्वैतभावो मोह आत्मावरणरूपकः क आक्षेपे पूर्ववत्। शोको विक्षेपरूपो दुःखवृक्षस्य बीजस्वरूपः सोऽपि क आवरणविक्षेपयोरभावे स्तुतिनिन्दादिकं दूरापास्तमित्यर्थः। विजानत इतिशब्दार्थमाह—एकत्वमनुपश्यतः। स्पष्टम्। ईश्वरस्वरूपमिदं सर्वमहमस्मीति विजानतः ॥ ७ ॥

आवरणविक्षेपयोरभाव उक्तः सोऽयमनुपपन्न ईश्वरस्याप्यात्मत्वाज्जीववच्छरीरादिसंबन्धः स्यादित्याशङ्क्य दृष्टान्ते साध्यवैकल्यं साध्यसमत्वं चाऽऽह—स ईश्वरस्वरूपाभिन्न आत्मा पर्यगात्परितः समन्तादधिगतवान्। शुक्रं दीप्तिमदीट्स्वरूपमहमस्मीति शुक्रविशेषणानि। अकायं कायः सूक्ष्मदेहो न विद्यते यस्य तदकायं तत्र हेतुरव्रणं व्रणश्छिद्रं भेद इत्यर्थः। न विद्यते व्रणो यस्य तदव्रणम्। स्थूले सति सूक्ष्मस्यापि सुसंपाद्यत्वमित्यत आह—अस्नाविरं स्नावानि शिरा न विद्यन्ते यस्य तदस्नाविरं स्थूलशरीररहितमित्यर्थः। स्थूलशरीरराहित्ये हेतुः-शुद्धं पुण्यपापादिरहितं पुण्यपापादिराहित्ये हेतुरपापविद्धं पापं दुःखहेतुरविद्या न तेन विद्धमपापविद्धं यस्मादेतादृशं शुक्रमहमस्मीति स जीवः पर्यगात्तस्मात्सोऽप्येवंविशेषणो न तद्दृष्टान्तेनेश्वरस्य संसारित्वमित्यर्थः। अनेजदादिरूपं यदुक्तमीट्स्वरूपं तदेवायं जीवोऽधिगन्ता पुंलिङ्गत्वेनोक्तोऽतस्तल्लिङ्गमुररीकृत्याऽऽह—कविः क्रान्तदर्श्यहं ब्रह्मात्माऽपेतसमस्ताविद्योऽस्मीतिज्ञानवानित्यर्थः। मनीषी सर्वस्य हृदि सत्त्वेन मनसो नियन्तृत्वात्तदीयाभिप्रायोऽस्यास्तीति मनीषी। परिभूः परितः समन्ताद्भवति विविधै रूपैरविद्यावशादिति परिभूरविद्यां वा परिभावयतीति परिभूः स्वयंभूः कारणान्तरनिरपेक्षः स्वयमेव भवतीति स्वयंभूरविद्यादशायां याथातथ्यतः साध्यसाधनादिप्रतिनियतस्वरूपेणार्थाश्चेतनाचेतनात्मकविविधपदार्थान्व्यदधाद्विविधं कल्पितवान्। ज्योतिष्टोमेनैव स्वर्गो

न कृष्यादिनेत्यादिना शाश्वतीभ्यः समाभ्यः संवत्सराभिधाभ्योऽस्मिन्न-स्मिन्काल इदमिदं भविष्यतीत्यादिनेत्यर्थः ॥ ८ ॥

इदानीं यस्तूक्तमात्मतत्त्वं न जानाति न च संन्यासेऽधिकारी संसारे च नात्यन्तं प्रीतिमांस्तमुररीकृत्य द्वितीयं मन्त्रं चार्थाद्व्याकर्तुमाह—अन्धं तमः। अहंममाभिमानरूपं प्रविशन्ति प्रकर्षेणाधिगच्छन्ति। के, ये धनाभिलाषिणः प्रसिद्धा द्वितीये मन्त्रेऽधिकारिणोऽविद्यां कर्मविधिनिष्पाद्यं ज्योतिष्टोमादि उपासते तदेकनिष्ठाः सन्तो विद्यामनुतिष्ठन्ति। ननु तर्हि त्याज्यं कर्मोपास्याश्च देवता अथवाऽहं ब्रह्मास्मीति वक्तव्यमित्यत आह-ततस्तस्मादुक्ताद्भूय इवाधिकमिव ते देवतोपासका मुख्यतो ब्रह्मवादिनो वाऽनुत्पन्नसाक्षात्काराः कर्मत्यागिनस्तमोऽहंममाभिमानरूपं प्रविशन्तीत्यनुषङ्गः। य उ ये तु विद्यायां देवताज्ञाने केवल आत्मज्ञाने वा रतास्तदेकनिष्ठाः ॥ ९ ॥

ननूभयोर्निन्दायामुभयमप्यफलमित्यत आह—अन्यदेव। कर्मणः फलात्पितृयाणलक्षणात्पृथगेव देवयानलक्षणमात्मप्राप्तिलक्षणं वा। अन्यच्छब्देन सफलत्वमेवशब्देनाङ्गाङ्गिभावनिषेध आहुः कथयन्ति। विद्यया देवताज्ञाने-नाऽऽत्मज्ञानेन वाऽन्यद्विद्याफलात्पृथग्भूतम्। अत्रैवकाराभावादात्मज्ञानो-त्पादकत्वमपि कर्मणामवगम्यते। आहुः कथयन्त्यविद्यया द्वितीयमन्त्रोक्तेन कर्मणेत्यस्ति विद्याकर्मणोः फलम्। नचात्राङ्गाङ्गिभावोऽपि शङ्कनीयः। अन्यदन्यच्च तदित्यनेन प्रकारेण शुश्रुम श्रुतवन्तः। मन्त्रद्रष्टुरिदं वाक्यम्। धीराणां पूर्वोत्तरतन्त्रन्यायकुशलानां वेदविदाम्। तानाह—ये गुरवो नोऽस्म-भ्यमेतद्ब्रह्म कर्मसहितं विचचक्षिरे व्याख्यातवन्तः ॥ १० ॥

एवं पक्षद्वयं[1] च वैधत्वादिना सफलं चाभिधायेदानीं देवताज्ञानस्य शाब्दस्य वा ब्रह्मज्ञानस्य कर्मणा सह समुच्चयमाह—विद्यां च देवताज्ञानं कोमलं ब्रह्मज्ञानं वा। अविद्यां च द्वितीयमन्त्रोक्तानि कर्माणि। चकारावुपायोपेयभावेन समुच्चयार्थौ। यः संजातवैराग्यः कर्म परित्यक्तुमशक्तोऽन्तरालावस्थस्तत्कर्म ज्ञानं च वेद जानाति। उभयमुक्तमुपायोपेयभावेन सह कर्मोपायो ब्रह्मज्ञानमुपेयमिति मिलितम्। एवमुपायोपेयज्ञानवतः फलमाह-अविद्यया द्वितीयमन्त्रोक्तेन कर्मज्ञानेन संयोगपृथक्त्वन्यायेन मृत्युमात्मज्ञानोत्पादप्रतिबन्धकं स्वाभाविकं कर्म ज्ञानं च दुःखकारणं तीर्त्वाऽऽत्मज्ञानोत्पादेनातिक्रम्य विद्ययाऽहं ब्रह्मास्मीति साक्षात्कारेणामृतं ब्रह्मात्मत्वमश्नुते व्याप्नोति स एव भवतीत्यर्थः। यदा

१ क. पक्षं द्वयं च द्विविधं विदित्वा स°।

तु ज्ञानकर्मणोरेव समुच्चयो नतु तज्ज्ञानयोस्तदोपायोपेयशब्दौ विहायाऽऽत्मज्ञानशब्दस्थले च देवताज्ञानमिति शब्दं पठित्वा—आभूतसंप्लवं स्थानममृतत्वं हि भाष्यत इति न्यायेनामृतं ब्रह्मलोकमिति व्याकुर्यात् ॥ ११ ॥

इदानीं व्याकृताव्याकृतयोरुपासनस्य समुच्चयार्थमाह—अन्धं तमः प्रविशन्ति येऽसंभूतिमुपासते । ततो भूय इव ते तमो य उ संभूत्यां रताः । अन्यदेवाऽऽहुः० अश्नुते । संभूतिम् । संभूतिः सम्यग्भवनमुत्पत्तिर्यस्य तत्कार्यं संभूतिः । तद्व्यतिरिक्तामव्याकृतरूपामसंभूतिं कारणं संभूत्यां कार्ये व्याकृते संभवाद्व्याकृतोपासनादसंभवादव्याकृतोपासनात्संभूतिमव्याकृतं विनाशेन विनाशवतः कार्यस्योपासनेन संभूत्या सम्यग्भवति यस्मात्कार्यं तत्कारणमव्याकृतं संभूतिस्तदुपासनेन शेषं कर्म देवताज्ञानसमुच्चयवन्मन्त्रत्रयेऽपि व्याख्येयम् ॥ १२ ॥ ॥ १३ ॥ १४ ॥

कार्यकारणात्मादित्यमण्डलस्थः पुरुषः समुच्चयद्वयेनापि संप्राप्योऽतस्तत्प्रार्थनामन्त्राः—हिरण्मयेन । सुवर्णविकारेणेव ज्योतिर्मण्डलेन पात्रेण शरावसदृशेन घटस्येव सत्यस्य बाधरहितस्यापिहितमाच्छादितं मुखं प्रतीकं प्रधानभूतं तद्धिरण्मयं पात्रं त्वं कार्यकारणात्मा पूषन्हे पुष्टिकारिन्नपावृणु अपसारय । अपसारणे कारणमाह—सत्यधर्मायावितथभावाय भवते दृष्टये दर्शनार्थं तव दर्शनार्थमित्यर्थः ॥ १५ ॥

इदानीं तत्संबोधनानि कार्यान्तरार्थं पूषन्हे पूषन्नेकर्षे एकश्चासावृषिश्चैकर्षिस्तत्संबोधनमेकर्ष एकाकित्वेन गन्तः । यम हे नियन्तः । सूर्य हे सुष्ठुगमन प्राजापत्य हे प्रजापतेरपत्यभूत । इदानीं कार्यमाह—व्यूह, उपसंहर रश्मीन्किरणान्समूह सम्यक्स्वात्ममात्रं कुरु तेजश्चन्द्रमण्डलम् । तत्रापि प्रयोजनमाह—यत्प्रसिद्धं ते तव रूपं स्वयंज्योतिःस्वभावं कल्याणतममतिशयेन कल्याणमानन्दात्मरूपं तदुक्तं ते तव पुनस्तेशब्द उपचारनिवारणार्थः । पश्यामि साक्षात्करोमि । द्रष्टृदृश्यप्रयुक्तं भेदं वारयति—यः प्रसिद्धोऽसावादित्यमण्डलस्थः परोक्षोऽसौ शास्त्रदृष्ट्या प्रत्यक्षः पुरुषः परिपूर्णः स उक्तो यः प्रसिद्धः स एवाहमस्मत्प्रत्ययालम्बनोऽस्मि भवामि ॥ १६ ॥

एते मन्त्रा हिरण्मयेनेत्यारभ्य पठिताः समुच्चयानुष्ठायिनाऽसकृन्नित्यं पठनीयाः । अन्तकाले तु सर्वार्थानुसंधानपुरःसरमात्मानमादित्यरूपं ध्यात्वा वायुः प्राणरूपोऽनिलं बाह्यवायुं यात्विति शेषः । अमृतमानन्दात्मरूपं सोऽहमस्मीति पूर्वेण संबन्धः । अथ वायुनिर्गमनानन्तरमिदं प्रत्यक्षं भस्मान्तम् । भस्मान्ते यस्मात्तद्भस्मान्तं शरीरं स्थूलं पार्थिवं पृथिवीं यात्विति शेषः । ॐ ॐ काराभिधेये शाभिन्नाऽऽत्मन्नादित्य क्रतो संकल्पात्मन्स्मर मां त्वदु-

पासकं स्मर कृतं मयाऽनुष्ठितं ज्ञानं कर्म च स्मर । स्पष्टम् । क्रत आदित्याभिन्न संकल्पात्मन् । हे जीवाऽऽत्मानं स्मर स्पष्टम् । आत्मना कृतं स्मर ॥ १७ ॥

उपास्यां देवतां संप्रार्थ्य कर्मसाधनभूतां देवतां प्रार्थयते—अग्ने हेऽग्ने नय प्रापय सुपथा सम्यङ्मार्गेण राये सुवर्णार्थं कर्मफलभूतायेत्यर्थः । अस्मान्समुच्चयानुष्ठातॄन्विश्वानि सर्वाणि देव हे देव वयुनानि ज्ञानानि विद्वाज्ञानन्युयोधि वियोजयास्मदुपासकेभ्यो जुहुराणं कुटिलमेनः पापं भूयिष्ठामतिशयेनाधिकां ते तुभ्यं नमउक्तिं नमस्कारोक्तिं विधेम विधास्यामः सर्वदा कुर्म इत्यर्थः ॥ १८ ॥

इति श्रीशंकरानन्दकृतेशावास्यदीपिका संपूर्णा ॥

अथ रामचन्द्रपण्डितकृतेशावास्यरहस्यविवृतिः ।

ॐ सत्यं ज्ञानमनन्तमीशमखिलस्यान्तर्बहिश्च स्थितं
यद्दूरे निकटे च यच्च सकलं यत्स्वप्रभं तद्विदः ।
अक्षागोचरमक्षचालकमहो येनेदमाच्छादितं
स्वात्माभिन्नमुपासते विजयते रामाभिधं तन्महः ॥ १ ॥
संसारबीजान्धतमिस्रनाशसर्वात्मताबोधजितारिषट्कम् ।
आनन्ददं सर्वसुहृत्तमं तं सिद्धेश्वरं सद्गुरुवर्यमीडे ॥ २ ॥
श्रीमच्छंकरभाष्यकृद्गुरुवरश्रीपादयुग्मं सदा
ध्यात्वा हृत्कमले यथास्वमति तत्सिद्धान्तसूक्तीस्तथा ।
टीका नैकविधा विचार्य कुरुते रामोऽथ माध्यंदिन-
स्थेशाख्योपनिषद्रहस्यविवृतिं श्रीसिद्धसूनुः कृती ॥ ३ ॥

इह खलु सर्वेषां वेदानामद्वैते ब्रह्मणि पर्यवसानमिति राद्धान्तस्तच्च ब्रह्म यथोक्ताधिकारिणे कथनीयम् । क्रियावन्तः श्रोत्रिया ब्रह्मनिष्ठाः स्वयं जुह्वत एकर्षिं श्रद्धयन्तः । तेषामेवैतां ब्रह्मविद्यां वदेतेति मुण्डकोपनिषदुक्तत्वात् । प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे । गुणान्वितायानुगताय नित्यं प्रदेयमेतत्सततं मुमुक्षवे । इति वचनाच्च । स चाधिकारश्चित्तशुद्धिं विना नोत्पद्यते । चित्तशुद्धिश्च स्ववर्णाश्रमोचितकर्माचरणेनेति प्रथमं कर्मकाण्डमेकोनचत्वारिंशदध्यायैः प्रतिपादितम् । अथेदानीं चित्तशुद्ध्यादियथोक्तगुणवन्तमधिकारिणमुपदेष्टुं ज्ञानकाण्डमेतेन चरमेणाध्यायेनाऽऽरभ्यते । सेयमीशावास्योपनिषद्ब्रह्मविद्यापराणां सहेतोः संसारस्यात्यन्तोच्छेदाद्ब्रह्मविद्योपनिषच्छब्दवाच्या । उपनीयेममात्मानं ब्रह्मापास्तद्वयं पुनः । निहन्त्यविद्यां तज्जं च तस्मादुपनिषन्मतेतिवचनाच्च । अन्तर्भावितण्यर्थस्य विशरणार्थस्य सद्धातोः क्विपि रूपम् । उप नितरां सादयति संसारहेतुभूतामविद्यां नाशयति । गत्यर्थस्य वा ब्रह्म प्रापयतीति । तदर्थप्रतिपादकग्रन्थोऽप्युपचारादुपनिषत्केवलस्य वा सदेरुपाऽऽत्मनः समीपे निषीदति प्रतिपादकत्वेनेत्यात्मयाथात्म्यप्रतिपादक इति । एषां च मन्त्राणां कर्मसु न विनियोगः । आत्मयाथात्म्यप्रतिपादकत्वात् । तच्च कर्मणा विरुध्यते । न हि वक्ष्यमाणलक्षणविशिष्ट आत्मा संस्कार्यः कर्ता भोक्ता वा । यो हि यथोक्ताधिकारवानहं ममेदमिष्टसाधनं दृष्टं ब्रह्मवर्चसाद्यदृष्टं स्वर्गादि च फलमाप्नुयामिति

मन्यते स कर्मण्यधिक्रियते । न हि स्वभावशुद्ध एकोऽशरीर्याकाशवन्निर्लेपोऽहमिति शास्त्रत आपातज्ञानवानपि कर्मणि प्रवृत्तो दृश्यते । किमुतापरोक्षज्ञानवानत एषां मन्त्राणामैकात्म्यतात्पर्यकत्वम् । ईशा वास्यमित्युपक्रम्य सोऽसावहमित्युपसंहारः । अनेजत्तदेजतीत्यभ्यासः । नैनद्देवा आप्नुवन्नित्यपूर्वता । तत्र को मोह इति फलम् । असुर्या नाम त इति भेददृष्टीनां कर्मकारिणां निन्दयैकात्म्यदर्शनस्तुतिरथवा स पर्यगादित्यादिनैकात्म्यदर्शिन ऐश्वर्यवर्णनं सदर्थवादः । तस्मिन्नपो मातरिश्वा दधातीत्युपपत्तिश्चेति षण्णां तात्पर्यलिङ्गानां दर्शनात् । तस्मादेते मन्त्रा भेदं निवर्तयन्तः संसारोच्छित्तिसाधनमात्मैकत्वविज्ञानमुत्पादयन्ति । अत्र दुःखहेतुस्वाज्ञाननिवर्तनेच्छुरधिकारी । आत्मनो याथात्म्यमभिधेयं विषयः । याथात्म्यस्य तद्वाचकशब्दानां च प्रतिपाद्यप्रतिपादकभावः संबन्धः । स्वगताज्ञाननिवृत्त्या सत्स्वरूपानन्दाविर्भावः प्रयोजनमित्यनुबन्धचतुष्टयम् । अथ मन्त्रान्संक्षेपतो व्याख्यास्यामः—ईशा वास्यमिति । ईष्ट इतीट् ईश ऐश्वर्ये क्विप् । तृतीयान्तमीशेति । ईश्वरणेदं प्रत्यक्षं सर्वं भूतजातं वास्यं वासयोग्यमधिष्ठानेनाऽऽच्छादनीयं वा निवासार्थकाद्वसेर्बाहुलकादधिकरणे ण्यत् । आच्छादनार्थस्य वा वसे रूपं कृत्यानां कर्तरि वेति षष्ठी विकल्पात्पक्षे तृतीया यच्छब्दो भिन्नक्रमः । चस्त्वर्थे यथोक्तानुभवसाधनमाह । किंतु यज्जगत्यामित्युपलक्षणं ब्रह्माण्डे जगत्स्थावरजङ्गमात्मकं तेन भूतजातेन त्यक्तेन न ममेति त्यक्तस्वीयत्वसंबन्धेन संन्यासेन यत आच्छादनीयमतो यत्किंच यावज्जगत्यां जगत्तेन त्यक्तेन नामरूपत्यागेन तद्बुद्ध्या गृहीतेनेति वा भुञ्जीथाः पूर्वोक्तमात्मानमनुभवेः । वा यदृच्छाप्राप्तभोगाननुभवेः । स्वात्मानं जननमरणादिदुःखात्पालयेथा वा । स्वसुखमनुभवेरिति वा । एतमेव प्रव्राजिनो लोकमीप्सन्तः प्रव्रजन्तीतिश्रुतेस्त्यागेनैके अमृतत्वमानशुः परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्तीतिश्रुतेश्च संन्यस्य श्रवणं कुर्यादित्युक्तेश्च ।

यदा मनसि वैराग्यं जायते सर्ववस्तुषु ।
तदैव संन्यसेद्विद्वानन्यथा पतितो भवेत् ॥

इत्युक्तत्वादधिकारं विना संन्यासे कृते प्रत्यवायापत्तिरित्यभिप्रायेणाऽऽह—मा गृधो माऽभिकाङ्क्षीः । स्विदित्यनर्थकोऽप्यर्थको वा । कस्यापि स्वस्य परस्य वा धनं भोग्यविषजातम् । ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति त्यक्तैषणस्यैव संन्यासेऽधिकारात् । यद्वा स्विदिति वितर्के । लोके

कस्येदं धनं न कस्यापि न हि लोके नियतस्वामिकं किंचिदपि विषयजातं दृश्यते । प्रश्ने वा । अधिष्ठानेनाध्यस्तस्य स्वस्वामिभावायोगात्कस्येदं धनमित्यर्थः । अतो माऽभिकाङ्क्षीः । केवलेच्छयैव विषयाणामवश्यमाप्त्यभावान्ममेदमिति रक्षितानां च स्थैर्याभावाद्विनाशे दुःखप्राप्तेश्च विषयेच्छात्यागपूर्वकसंन्यासिना ब्रह्मणः सर्वान्तरस्थत्वं ज्ञेयमिति भावः । अथवा स्वात्मना विभुनाऽधिष्ठानेन ज्ञातेन रज्ज्वादिनाऽध्यस्तसर्पादिभासवदध्यस्तजगद्भास आच्छादिते दूरीकृते सति स्वातिरिक्तस्य विषयस्याभावादिच्छानुत्पत्तेः स्वात्मनैव स्वसुखमनुभवनीयमिति तात्पर्यम् । आत्मक्रीड आत्मरतिः क्रियावानेष ब्रह्मविदां वरिष्ठ इति श्रुतेः। वासिष्ठे समाध्युत्थितस्य कचस्य— किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् । आत्मना पूरितं सर्वं महाकल्पाम्बुना यथेति वाक्याच्च ॥ १ ॥ अत्रायं संग्राहकः श्लोकः—

छाद्यं मयेशेन समस्तमेतज्ज्ञात्वेति संन्यस्य सुखं हि भोग्यम् ।
धनस्य गृद्धिं न कुरु त्वमन्यत्स्वतोऽस्ति किं कस्य धनं त्रिलोक्याम् ॥१॥

ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
संपूर्णः प्रथमो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

त्यक्तैषणस्य संन्यासेऽधिकार इति श्रुत्वैषणात्यागसाधनं प्रष्टुकामस्य श्रोतुः प्रश्नात्पूर्वमेव सर्वज्ञा श्रुतिश्चित्तशुद्धिरीषणात्यागोपाय इत्यभिप्रायेण चित्तशुद्ध्यर्थं त्वया तावत्कर्माणि कर्तव्यानीत्युपदिशति । अथवाऽऽत्मतत्त्वमुपक्रम्य स्वानुभवप्रदर्शनेन श्रोतारमभिमुखीकृत्य प्रष्टुमिच्छन्तं तमुपदेष्टुकामा श्रुतिः शुद्धचित्तस्यैव श्रवणेऽधिकारादधिकारसिद्ध्यै पूर्वं तत्साधनमुपदिशति—कुर्वन्निति । एव शब्दो भिन्नक्रमः । इह नृलोके कर्माण्येव केवलानि नतु फलेच्छां कुर्वन् । कर्मण्येवाधिकारस्ते मा फलेषु कदाचनेति भगवतोक्तत्वात् । फलेच्छैव बन्धनकर्त्रीति भावः । त्वं जिजीविषेज्जिजीविषेः पुरुषव्यत्ययश्छान्दसः। भवाञ्जिजीविषेदिति वा शतं समा इत्युपलक्षणं सर्वस्य पुरुषायुषस्य यावदायुरित्यर्थः । अनेन मनुष्यस्यैव कर्माद्यधिकार इति सूचितम् । जीवनेच्छोक्त्या संन्यासाधिकाराभावो न जीविते मरणे वा गृधिं कुर्यादरण्यमियादिति श्रीभगवत्पादैरिच्छारहितस्यैव संन्यासेऽधिकारस्योक्तत्वादरण्यं स्त्रीजनासंकीर्णमाश्रमं संन्यासमित्यर्थः । ननु यदि फलेच्छाया अभावस्तदेष्टसाधनताज्ञानं विना प्रवृत्त्यनुपपत्त्या कर्मणि प्रवृत्तिरेव न स्यादिति चेत्सत्यं भगवदधीनोऽहं तस्मादसक्तः सततं कार्यं कर्म समाचरेति गीतायामुक्तत्वात्तदाज्ञोल्लङ्घने प्रत्यवायोत्पत्त्या ममानिष्टं स्यादतोऽवश्यं मया कर्माणि कर्तव्यानीत्येवं निश्चयेन नित्यनैमि-

त्तिकादिकाम्यकर्मसु प्रवृत्तेः सूपपन्नत्वात् । ननु कर्मणा बन्धः स्यादिति चेन्न । असक्तो ह्याचरन्कर्म परमाप्नोति पूरुष इति भगवतोक्तत्वान्निष्कामकर्मणा मुक्तिरेवेत्यभिप्रायेणाऽऽह—एवं निष्कामकर्माणि कुर्वतस्त्वयि तव विभक्तिव्यत्ययश्छान्दसः । वृक्षे शाखेतिवदधिकरणत्वविवक्षया वा सप्तमी । नरे नृदेहधारिणि कर्म न लिप्यते । कर्मफललेपो न स्यात् । किंतु चित्तशुद्धिद्वाराऽधिकारसंपत्त्या ज्ञानसिद्ध्या मुक्तिरेव स्यादिति भावः । अनेन मनुष्यस्यैव कर्मफलसंबन्ध इति बोधितम् । अधिकारसंपादकचित्तशुद्धेः कर्मातिरिक्तसाधनासिद्धत्वं दर्शयति—इतो निष्कामकर्माचरणादन्यथा प्रकारान्तरं तव मुमुक्षोर्नास्ति येन त्वं शुद्धचित्तः सन्नधिकारी भविष्यसीत्यर्थः । आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानस इति श्रीरामगीतायामुक्तत्वात् । स्ववर्णाश्रमधर्मेण तपसा हरितोषणात् । साधनं प्रभवेत्पुंसां वैराग्यादिचतुष्टयमिति भगवत्पादोक्तेश्च । यावदिच्छा तावत्कर्मस्वधिकार इति तात्पर्यम् । तावत्कर्माणि कुर्वीत न निर्विद्येत यावतेति भागवतात् ॥ २ ॥ अत्रायं संग्राहकः श्लोकः—

निष्कामकर्माणि तु यावदायुस्त्वमिच्छ कर्तुं खलु यन्मुमुक्षुः ।
एवं तव स्यान्नफले न लेपो न चित्तशुद्धावितरः प्रकारः ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
मन्त्रो द्वितीयः संपूर्णः प्रीयतां तेन राघवः ॥ २ ॥

साधकस्य निष्कामकर्मस्वधिकार इत्युक्तमर्थं काम्यकर्मपराणां बलवदनिष्टफलकथनव्याजेन काम्यकर्मनिन्दया प्रबलयति—असुर्या इति । असुर्या असुषु प्राणेषु रमन्त इत्यसुराः प्राणपोषका ज्ञानहीनाः केवलप्राणपोषिणो देवा अप्यसुरा एव । अन्येष्वपि दृश्यत इत्यत्रापिशब्दस्य सर्वोपाधिव्यभिचारार्थत्वात्—रमधातोरपि डः । तेषामिमेऽसुर्याः । तद्धिता इति बहुवचनस्यानुक्तसंग्रहार्थत्वादिदमर्थे । यन्नाम प्रसिद्धाः । ते यच्छब्दस्थाने तच्छब्दः । ये लोका लोक्यतेऽनुभूयते कर्मफलं येषु ते लोका जन्मानि स्थानानि वा तिर्यगादीनि नरकादीनि चान्धेन तमसा विचारशून्यत्वात्स्वाभाविकेनाज्ञानेनान्धतामिस्रेण वाऽऽवृता आच्छादितज्ञाना निरिन्द्रियप्रचारा वा तान्पूर्वोक्तोभयविधेष्वन्यतरान्स्वकर्मानुसारेण तत्रोत्पद्य ते जना नराः प्रेत्यापि मरणं प्राप्य पुनरपि गच्छन्ति प्राप्नुवन्ति । तच्छब्दोक्तान्निर्दिशति—ये के च । अनेन जातिगुणादिनिरपेक्षत्वं सूच्यते । आत्महनो यथा गुरूणामवज्ञाकारी गुरुघातीत्युच्यते तथाऽतिपूज्यस्य सर्वप्रकाशकस्याप्यात्मनो

देह एवाहं नाऽऽत्मा कश्चनास्तीत्यवज्ञाकारिण आत्मघातिनस्ते। अनेन देहान्तरप्राप्तिरपि नरदेहकृतसंचितकर्मबीजनिबन्धनेति सूचयति। प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म। एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्युं ते पुनरेवापि यन्ति॥ १ ॥नाकस्य पृष्ठे सुकृतेऽनुभूत्वेमं लोकं हीनतरं वा विशन्तीति च मुण्डकोपनिषदुक्तत्वात्। तानहं द्विषतः क्रूरान्संसारेषु नराधमान्। क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु॥ १ ॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि। मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ॥ २ ॥ इति भगवद्वाक्याच्च। प्राणपोषणार्थं नानाविधकाम्यकर्मपराणां पुनः पुन संसरणेन मुक्तिर्नास्तीति तात्पर्यम् ॥ ३ ॥ अत्रायं संग्राहकः श्लोकः—

स्वात्मानभिज्ञा निजघातिनस्ते प्रमीय मर्त्या असुपोषिभोग्यान्।
विचारशून्याननतिदुःखयुक्तान्प्रयान्ति देहान्खरनारकादीन् ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा।
मन्त्रस्तृतीयः संपूर्णः प्रीयतां तेन राघवः ॥ २ ॥

कीदृशः स आत्मा यस्याज्ञानेन जनाः संसरन्तीत्याकाङ्क्षायामाह। अथवा येनेश्वरेण सकलमाच्छादितं तस्य स्वरूपमाह। यद्वाऽनुभवसाधनं प्रदर्श्योपक्रान्तमात्मस्वरूपमुपसंहरति। अथवाऽन्वयव्यतिरेकाभ्यां निष्कामकर्मणः श्रवणाधिकारसाधनत्वं प्रदर्श्य श्रोतव्यमात्मतत्त्वमुपदिशति—अनेजदिति। नैजाति चलति तदनेजत्स्वावस्थाप्रच्युतिश्चलनं तद्वर्जितम्। अनेन बाल्यादीनां जाग्रदादीनां चाभावः। बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा स्वात्मानं प्रकटी करोतीति भगवत्पादैरुक्तत्वात्। एकमद्वितीयम्। एकमेवाद्वितीयं ब्रह्मेति श्रुतेः। अथवैकं सर्वदैकरूपं वृद्ध्यपक्षयविपरिणामशून्यं मनसो जवीयः संकल्पलक्षणादतिचञ्चलान्मनसोऽपि जवीयो वेगवत्तरम्। अपाणिपादो जवनो ग्रहीतेतिश्रुतेः। देहस्थस्यापि मनसः क्षणाद्ब्रह्मलोकगमने व्यापकत्वात्तत्र पूर्वंगतमिवास्ति। परं त्वचिन्त्यत्वान्मनसा प्राप्तुमशक्यं न तु चक्षुरादिविषयवन्मनसा साक्षादनाप्यं यत एनदात्मस्वरूपं देवा द्योतनात्मकानि चक्षुरादीन्द्रियाणि नाऽऽप्नुवन्न प्राप्तवन्तः। अव्यपदेश्यत्वादिन्द्रियागोचरमित्यर्थः। अथवा मनोव्यापारपूर्वकत्वादिन्द्रियप्रवृत्तेर्यन्मनसोऽगोचरं तदिन्द्रियाणां सुतरामगोचरम्। यद्वाचाऽनभ्युदितं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धीत्यादिना मनःप्राणेन्द्रियाप्राप्यत्वस्य केनोपनिषदुक्तत्वात्। पूर्वमनादि जन्मरहितमर्शत्। रिश हिंसायामित्यस्य शत्रन्तस्य रूपं न रिशदविनाशि धातोरिकारलोपश्छान्दसः। तदादिमध्यान्तविहीनमेकमिति श्रुतेः। तद्ब्रह्म तिष्ठत्या

पकत्वेन सर्वत्र स्थितिमत्सद्भावतो द्रुतं गच्छतोऽन्यान्कालवाय्वादीनत्येत्यतिक्रम्य गच्छतीव तेषां गत्याऽप्राप्यमित्यर्थः । आसीनो दूरं व्रजति शयानो याति सर्वत इति श्रुतेः । मातरिश्वा देहान्तर्गतो वायुस्तस्मिन्देहान्तर्विद्यमाने सत्यप आप्यन्ते प्राणादिसंज्ञा याभिस्ता आप आप्नोतेर्ह्रस्वश्चेति करणे क्विप्ताः क्रियाः प्राणनादिचेष्टा दधाति धारयति । अथवा समिष्टयजुषि वातेधा इति सर्वकर्मणां वायुस्थत्वोक्तेरपः श्रद्धा वा आप इति श्रुतेः श्रद्धाजन्यत्वादापः कर्माणि स्वस्थानि तानि वायुस्तत्र ब्रह्मणि दधाति स्थापयति कर्मणां परमं निधानमित्यर्थः । अथवा तत्रान्तर्यामिणि सति वायुः सूत्रात्मा तपनवारिदादीनां कर्माणि तपनवर्षणादीनि । वायुना हि गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति श्रुतेः क्रियाशक्तिमत्त्वाद्दधाति विभज्य धारयति । अन्तर्यामितया तस्यैव सर्वेशत्वादन्तर्यामिब्राह्मणे सर्वान्तर्यामित्वेन यः पृथिव्यां तिष्ठन्नित्यादिना तस्यैव सर्वनियामकत्वोक्तेर्भीषाऽस्माद्वातः पवत इत्यादितैत्तिरीयश्रुतेश्च स वा अयमात्मा सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः सर्वमिदं प्रशास्ति यदिदं किंचेति स सेतुर्विधरण एषां लोकानामसंभेदायेति शारीरब्राह्मण उक्तत्वाच्चाचिन्त्यमव्यपदेश्यं षड्भावविकाररहितं सर्वदैकरूपं सर्वान्तर्यामि सर्वचालकं ब्रह्मेत्यर्थः ॥ ४ ॥ अत्रायं संग्राहकः श्लोकः—

> अकम्पमेकं मनसस्तरस्विन्न देवता आपुरनाशि पूर्वम् ।
> तिष्ठत्तदत्येत्यपि धावतोऽन्यान्वायुर्हि कर्माणि दधाति तत्र ॥ १ ॥
>
> ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
> मन्त्रश्चतुर्थः संपूर्णः प्रीयतां तेन राघवः ॥ २ ॥

उक्तमर्थमन्योऽपि मन्त्रो वदति । अथवाऽऽत्मतत्त्वस्यातीतमन्त्रोक्तदुष्प्रापत्वान्तर्यामित्वव्यापकत्वानुवादेन तस्यैव सर्वात्मकत्वं सुखप्राप्यत्वं च श्रुतिरुपपादयति । नात्र पुनरुक्तिर्न मन्त्राणां जामितादोष इति भगवत्पादैरुक्तत्वात् । जामिताऽऽलस्यं रहस्यम् । सकृदुक्तं चित्ते नाऽऽयातीत्यनलसा श्रुतिः सकरुणा मातेव पुनः पुनरुपदिशति—तदेजतीति । तत्प्रकृतमात्मतत्त्वमेजति चलति जङ्गमं तन्नैजति न चलति स्थावरम् । पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यमिति श्रुतेः । तदात्मतत्त्वं दूरे विप्रकृष्टे तदु उ एवार्थे यद्दूरस्थं तदेवान्तिके समीपे समीपस्थमपि तदेव दूरस्थमन्तिकस्थं ब्रह्मैव सर्वगत्वात् । अथवा सर्वरूपत्वाद्दूरस्थमन्तिकस्थं च ब्रह्मैव । अथवाऽज्ञानिनां वर्षकोटिभिरप्यप्राप्यत्वा-

त्वाद्दूर इव स्थितम् । आत्मज्ञानिनां तु समीप एवाऽऽत्मत्वेन हृत्स्थत्वात्सुप्रापं तद्ब्रह्मास्य प्रत्यक्षस्य सर्वस्य भूतजातस्यान्तरभ्यन्तरेऽन्तर्यामित्वेनास्ति । तदु तदेव सर्वस्यास्य बाह्यतो बाह्यप्रदेश उत्तमपुरुषत्वेन सार्वविभक्तिकस्तासिः । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतेः । बहिरन्तश्च भूतानामचरं चरमेव च । सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तदिति । क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते । उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति च गीतावाक्याच्च ॥ ५ ॥ अत्रायं संग्राहकः श्लोकः—

ब्रह्मैव तत्स्थावरजङ्गमात्म त्वाज्ञानिनां दूर इवाप्रकाशम् ।
तज्ज्ञानिनां भाति सदा समीपे विश्वस्य चान्तश्च बहिस्थितं तत् ॥ १॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
संपूर्णः पञ्चमो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

उक्तात्मज्ञानस्य फलमाह—यस्त्विति । यस्तु तुशब्दो वैलक्षण्यद्योतको यः पुनर्लोकविलक्षणदृष्टिः सर्वाणि भूतान्यव्यक्तादिस्थावरान्तान्यात्मन्यात्मनि सुपांसुलुगिति ङेर्लुगधिष्ठानरूप एवानु गुरूपदेशानन्तरं पश्यत्यवलोकयति च परं सर्वभूतेषु तेष्वात्मानमनु कारणात्मनाऽनुगतं पश्यत्यनुभवति । तत ऐकात्म्यज्ञानात्स पुरुषो न विचिकित्सति संशयं न प्राप्नोति । संशय उभयकोटिकं ज्ञानं द्वैतं पश्यतो भवति नत्वैकात्म्यज्ञस्येति भावः । यदैतमनुपश्यत्यात्मानं देवमञ्जसा । ईशानं भूतभव्यस्य न तदा विचिकित्सतीति बृहदारण्यकश्रुतेः । सर्वभूतस्थमात्मानं सर्वभूतानि चाऽऽत्मनि । संपश्यन्ब्रह्म परमं याति नान्येन हेतुनेति कैवल्यश्रुतेश्च । अस्या एव श्रुतेरुत्तरार्धं गीतायाम्—ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन इति । छिद्यन्ते सर्वसंशयास्तस्मिन्दृष्टे परावर इति मुण्डकश्रुतेश्च ॥ ६ ॥ अत्रायं संग्राहकः श्लोकः—

यः पश्यतीत्थं सकलानि भूतान्यात्मन्यथाऽऽत्मानमपीह विद्वान् ।
सर्वेषु भूतेषु स तत्त्ववेत्ता निःसंशयः स्यात्सकलैरनिन्द्यः ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
मन्त्रः षष्ठोऽपि संपूर्णः प्रीयतां तेन राघवः ॥ २ ॥

अधुनाऽऽत्मज्ञस्य स्थितिमाह—यस्मिन्निति । यस्मिन्काले विजानत आत्मानं साक्षात्कुर्वतः सर्वाणि भूतानि ब्रह्मादिस्थावरान्तानि न मद्व्यतिरिक्तं किंचिदस्त्यहमेव सर्वरूप इत्यात्मैवाभूत्संवृत्तः । तत्र तस्मिन्काल एकत्वमनैकात्म्यमन्वनुस्यूतं पश्यतोऽनुभवतो मोह आवरणरूपः

कः किंनिमित्तकः शोकश्च विक्षेपरूपः कः किंनिमित्तक आत्मज्ञानेनाविद्याया निरस्तत्वात्स्वरूपं जानतः समूलाविद्योच्छेदादावरणविक्षेपयोरभावेन कामाद्यनुदयाज्जीवन्मुक्तिस्थित्या तूष्णींभूत आस्त इत्यर्थः। यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना तस्य निष्क्रियत्वाभिधानात्। आत्मन्येव च संतुष्टस्तस्य कार्यं न विद्यत इति भगवद्वाक्याच्च ॥७॥
अत्रायं संग्राहकः श्लोकः—

सर्वाणि भूतानि मदात्मकानीत्येवंविदोऽभूत्सकलं यदात्मा।
तदैकतां पश्यत आत्मरूपे मोहश्च शोकश्च भवेत्कथंस्वित् ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा।
संपूर्णः सप्तमो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

आत्मज्ञस्थितिमुक्त्वा पुनरात्मस्वरूपं लोकोत्तरैश्वर्यप्रदर्शनेनोपसंहर्तुं वर्णयति—स पर्यगादिति। अत्र स इत्युत्तरार्धे च कविरित्यादिशब्दैः पुंलिङ्गत्वेन निर्देशाच्छुक्रमित्यादीनि विशेषणानि पुंलिङ्गत्वेन विपरिणम्यान्यथवा स इति शब्दो भिन्नक्रम उत्तरार्धेन संबध्यते। यत्तदोर्नित्यसंबन्धात्। यद्ब्रह्म पर्यगात्परिः सर्वतोभावे सर्वतो जगद्व्याप्याऽऽसीत्। शुक्रं शुद्धं दीप्तिमत्स्वप्रकाशम्। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः। अकायं सूक्ष्मदेहरहितमव्रणं व्रणः क्षतं तद्रहितमस्नाविरं स्नाविराः शिरा न सन्ति यस्य तन्निरवयवत्वादव्रणमस्नाविरमिति विशेषणद्वयेन स्थूलशरीरनिरासः। अशरीरं शरीरेष्वनवस्थेष्ववस्थितमिति श्रुतेः। शुद्धं मायासंबन्धरहितं विरजः पर आकाशादिति श्रुतेस्तमसः परमुच्यत इति गीतावाक्याच्च। अपापविद्धं पुण्यमपि पुनरावृत्तिहेतुत्वात्पापमेव तेनोभयात्मकेनाविद्धमसंबद्धं स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानिति श्रुतेः। नाऽऽदत्ते कस्यचित्पापं न चैव सुकृतं विभुरिति भगवद्वाक्याच्च। स एतादृशं ब्रह्मैव स्वशक्तिमादायेश्वरो भूत्वा कविरतीतानागतज्ञः। वेदाहं समतीतानि वर्तमानानि चार्जुन। भविष्याणि च भूतानीति गीतायामुक्तत्वात्। मनीषी मनीषा जगत्सर्जनेच्छा तद्वान्। सोऽकामयत बहु स्यां प्रजायेयेति श्रुतेः। अथवा मनोनियन्ता मनसो ये मनो विदुरिति श्रुतेः। परिभूः परिरुपर्यर्थकः परि सर्वेषामुपरि श्रेष्ठत्वेन भवत्यस्तीति परिभूः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिरिति श्रुतेः। स्वयंभूः स्वयमेव भवति न तु कारणान्तरेणेत्यर्थः। अथवा येषामुपरि यश्चोपरि तत्सर्वं स्वयमेव भवतीति सर्वरूपः। याथातथ्यतो यथातथाभावो याथातथ्यं तेनेति याथातथ्यतः साध्यसाधनादिप्रतिनियतस्वरूपेणार्थान्श्रे-

तनाचेतनरूपपदार्थान्व्यदधाद्विभज्य दत्तवान्। शाश्वतीभ्यो नित्याभ्यः समाभ्यः संवत्सराख्येभ्यः प्रजापतिभ्यो यो वै स संवत्सरः प्रजापतिः षोडशकल इति श्रुतेरचिन्त्यशक्तिमद्ब्रह्मेति भावः। अत्रार्थे श्लोकयोजना—यद्व्यापकं शुद्धमपापविद्धं देहद्वयातीतमतिप्रकाशम्। कविः स धीमान्प्रवरः स्वयंभूः प्रजापतिभ्यो व्यदधाद्यथार्थान् ॥१॥ अथवा यथोक्तात्मज्ञस्योक्तानुवादपूर्वकमैश्वर्यमाह—सशब्द उत्तरार्धेनैव संबध्यते यः शुक्रमित्यादि यथोक्तविशेषणविशिष्टं ब्रह्म पर्यगात्सर्वभावेन ज्ञानवान्। गत्यर्थानां बुद्ध्यर्थत्वात्स ब्रह्मज्ञः कविः क्रान्तदर्शी। मनीषी द्वैतासंबन्धेन प्रशस्तबुद्धिमान्परितः सर्वमपि स्वयमेव भवतीति परिभूः सकलात्मकः। स्वयंभूर्ब्रह्मरूपो यथास्वरूपं तेन तेन रूपेणार्थान्पदार्थान्भोग्यविषयान्। शाश्वतीभ्यः समाभ्यस्तादर्थ्ये चतुर्थ्यनन्तवर्षोपभोगाय व्यदधात्स्वयमेव कृतवान्। यस्यानुवित्तः प्रतिबुद्ध आत्माऽस्मिन्संदेहे गहने प्रविष्टः। स विश्वकृत्स हि सर्वस्य कर्तेति श्रुतेर्ब्रह्मविद्ब्रह्मैव भवतीति भावः ॥ ८ ॥ अत्रायं संग्राहकः श्लोकः—

यो ज्ञातवाञ्शुद्धमपापविद्धं देहद्वयातीतमतिप्रकाशम्।
कविः स धीमान्सकलः स्वयंभूर्व्यधाद्यथास्वं बहुकालमर्थान् ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा।
संपूर्णश्चाष्टमो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

उपक्रान्तमात्मतत्त्वमुपसंहृत्य यस्तूक्ततत्त्वानभिज्ञ ईषणात्यागाभावेन संन्यासे च नाधिकारी संसारे च नात्यन्तं सक्तस्तं प्रति चित्तैकाग्र्यार्थमुपासनासमुच्चयं कथयिष्यन्प्रत्येकमुपासनां फलकथनव्याजेन निन्दति। अथवोक्तात्मज्ञानस्याखिलश्रेष्ठत्वं तद्व्यतिरिक्तानां संसरणहेतुत्वप्रदर्शनेन द्रढयति—अन्धं तम इति। ये नरा असंभूतिं सम्यग्भवनं भूतिरुत्पत्तिर्यस्य कार्यस्य तद्भिन्नां कारणरूपामव्याकृताख्यां प्रकृतिमुपासते चिन्तयन्ति तेऽन्धं तमोऽदर्शनात्मिकां प्रकृतिं प्रविशन्ति प्रकर्षेण विशन्ति पौराणिकोक्तं प्रकृतिलयं प्राप्नुवन्ति। तं यथा यथोपासते तदेव भवतीति श्रुतेः। य उ। ये तु संभूत्यां प्रकृतिकार्ये हिरण्यगर्भाख्ये रता आसक्तास्तदुपासका इत्यर्थः। ते ततः प्रकृतिलयाद्भूय इवाधिकमिव स्वरूपाज्ञानेन संसरणहेतुत्वात्तमोऽणिमादिसिद्धिसमुदायं प्रविशन्ति प्राप्नुवन्ति ॥ ९ ॥ अत्रायं संग्राहकः श्लोकः—

अव्याकृतं हेतुमुपासते ये संप्राप्नुवन्ति प्रकृतौ लयं ते।
प्रजापतिं कार्यमुपासते ये ते प्राप्नुवन्ति ह्यणिमादिसिद्धीः ॥ १ ॥

ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
संपूर्णो नवमो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

व्याकृताव्याकृतोपासनयोर्भिन्नफलत्वे श्रुतिरार्यवचः प्रमाणयति—अन्यदेवेति । संभवात्संभूतिरूपकार्यप्रजापत्युपासनादन्यदेव भिन्नमेवाणिमादिसिद्धिरूपं फलं तत्त्वज्ञा आहुर्वदन्ति तथाऽसंभवादसंभूतिरूपकारणाव्याकृताख्यप्रकृत्युपासनादन्यत्प्रकृतिलयाख्यं फलमाहुः कथयन्त्युपास्योपासनयोरभेदविवक्षया संभवादसंभवादित्युक्तं ये ज्ञानिनो नोऽस्मभ्यं भाष्यमतेऽन्वर्थसंज्ञा विज्ञानाभावात्संप्रदानत्वम् । अस्मान्वा । अकथितं चेति व्यापारद्वयार्थत्वाद्वा द्विकर्मत्वं तदुपासनाद्वयतत्त्वं विचचक्षिरे व्याख्यातवन्तस्तेषां धीराणां वाक्यमिति शेषः । अथवा प्रसिद्धत्वाद्वाक्यमिति कर्मणोऽप्रयोग आख्यातोपयोग इत्यपादानत्वस्याविवक्षया शेषे षष्ठी धीरेभ्य इत्यर्थः । इति पूर्वार्धोक्तप्रकारेण वयं शुश्रुम श्रुतवन्तः ॥ १० ॥ अत्रायं संग्राहकः श्लोकः—

अन्यत्फलं कार्यमुपासतां स्यादुपासतां कारणमन्यदेव ।
एतस्य तत्त्वं विबुधा य ऊचुस्तेषां पुरा वाक्यमिति श्रुतं नः ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
संपूर्णो दशमो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

यत एवमत उभयोः समुच्चयो युक्त इत्याह—संभूतिमिति । यः पुमान्संभूतिं चावर्णलोपः पृषोदरादित्वात् । असंभूतिं प्रकृतिमथवा सम्यग्भवत्यस्याः कार्यमिति संभूतिः कारणं पूर्वापरसंदर्भानुसारेण वक्तुरभिप्रायस्याभिधानियामकत्वात्प्रकृतिस्तां च परं विनाशं च । चेत्यर्थे । विनाशोऽस्यास्तीति विनाशं कार्यम् । अर्शआद्यच् । तदुभयं कार्यकारणोपासनाद्वयं सह समुच्चितं फलदमिति वेद जानाति स विनाशेन हिरण्यगर्भाख्यकार्योपासनेन । मृत्युमनैश्वर्यादिदुःखजातं तीर्त्वाऽतिक्रम्यासंभूत्या । अथवा पूर्वोक्तप्रकारेण संभूत्याऽव्याकृताख्यकारणोपासनेन । यथाऽस्मदपेक्षयाऽधिकजीवनेन देवा अमरास्तथाऽऽपेक्षिकममृतं प्रकृतिलयमश्नुते प्राप्नोति ॥ १ ॥ अत्रायं संग्राहकः श्लोकः—

उपासने कार्यनिदानयोस्ते समाश्रिते वेद परस्परं यः ।
तत्राऽऽद्यया प्राप्य स ईश्वरत्वं द्वितीयया याति लयं प्रकृत्याम् ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
पूर्ण एकादशो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

अधुना कर्मणोपासनां समुच्चिचीषन्प्रत्येकमुभयं फलं प्रदर्श्य निन्दति ।

अथवा व्याकृताव्याकृतोपासनयोः फलं प्रदर्श्य कर्मणां देवतान्तरोपासनानां च फलं दर्शयति—अन्धं तम इति। ये नरा अविद्यां विद्या ज्ञानं तद्भिन्नाऽविद्या तां कर्म केवलमुपासते तत्पराः सन्तोऽनुतिष्ठन्ति तेऽन्धं तमो जन्ममरणरूपं प्रविशन्ति प्राप्नुवन्ति य उ ये त्वशुद्धचित्ता अपि कर्म न कुर्वन्ति किंतु केवलायां विद्यायां देवतोपासनायां रता आसक्तास्ते कर्माधिकारे सत्यपि कर्मत्यागेन प्रत्यवायरूपदोषयुक्ताः सन्तस्ततः कर्मानुष्ठातृभ्यो भूय इवाधिकमिव तमः संसरणलक्षणं प्रविशन्ति प्राप्नुवन्त्युपासनाफलं नाश्नुवते। किंतु संसरन्तीति भावः॥ १२॥ अत्रायं संग्राहकः श्लोकः—

उपासते केवलकर्मजालं ये संसरन्तीह पुनः पुनस्ते।
तेभ्योऽधिकं यान्ति गतागतं ते उपासते केवलदेवतानि॥ १॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा।
संपूर्णो द्वादशो मन्त्रः प्रीयतां तेन राघवः॥ २॥

उक्तार्थे श्रुतिविद्वद्वचः प्रमाणयति—अन्यदेवेति। विद्याया देवतोपासनायाः फलमन्यदेव। विद्यया देवलोक इति श्रुतेर्देवलोकप्राप्तिलक्षणं प्राज्ञा आहुः। तथाऽविद्यायाः कर्मणोऽन्यत्कर्मणा पितृलोक इति वचनात्पितृलोकप्राप्तिलक्षणमाहुर्दूरमेते विपरीते विषूची अविद्या या च विद्येति श्रुतेश्च। एवंप्रकारेणोभयतत्त्वव्याख्यातृभ्यः पूर्वमस्माभिः श्रुतमस्तीति तात्पर्यं पदव्याख्या तु व्याकृताव्याकृतोपासनावन्मन्त्रे कृता॥ १३॥ अत्रायं संग्राहकः श्लोकः—

बुधाः फलं कर्मण आहुरन्यत्स्याद्देवतोपास्तिफलं तथाऽन्यत्।
ये तस्य तत्त्वं गुरवो न ऊचुस्तेभ्यः पुराऽस्माभिरिति श्रुतं हि॥ १॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा।
पूर्णस्त्रयोदशो मन्त्रः प्रीयतां तेन राघवः॥ २॥

उभयोः समुच्चये फलमाह—विद्यां चेति। विद्यां च देवतोपासनामविद्यां च कर्म तदुभयं सह समुचितं फलदात्रिति यः पुमान्वेद सोऽविद्यया कर्मणा मृत्युं स्वाभाविकमज्ञानं विस्मरणलक्षणं तीर्त्वा दूरीकृत्य विद्यया देवतोपासनेनामृतं देवतात्मभावमश्नुते प्राप्नोति तद्ध्यमृतमुच्यते यद्देवतात्मगमनमिति श्रुतेः। अत्रार्थे श्लोकयोजना—यो देवतोपास्तिमथापि कर्म एकेन कार्यं पुरुषेण वेद। स्वकर्मणा मृत्युमतीत्य विद्वान्स विद्ययाऽऽप्नोति हि देवतात्वम्॥ १॥ अथवा कर्मणामुपासनानां च फलं प्रदर्श्याऽऽत्मज्ञानेनैव कृतकृत्यतेति श्रुतिरुपपादयति वक्तृतात्पर्यस्याभिधानियामकत्वात्। विद्यामात्मज्ञानं

च परमविद्यां च कर्मेत्युभयं पाठक्रमादर्थक्रमो बलीयानिति कर्माऽऽत्मज्ञानं च पूर्वापराधिकारभेदेन सहैकपुरुषकर्तव्यत्वेन समुचितं यो वेद सोऽविद्यया कर्मणोपासनाऽपि मानसं कर्मैव मृत्युं स्वरूपाविस्मरणहेतुं चित्तमलमनैकाऽयं तीर्त्वाऽतिक्रम्य विद्ययाऽऽत्मज्ञानेनामृतं मोक्षमश्नुते । तमेव विदित्वाऽति मृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुतेः ॥ १४ ॥ अत्रायं संग्राहकः श्लोकः—

कर्माऽऽत्मविज्ञानमपि क्रमेण संपाद्यमेकेन नरेण वेद ।
यः कर्मणा चित्तविशुद्धिमाप्य स विद्ययाऽऽप्नोत्यमृतं हि विद्वान् ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
पूर्णश्चतुर्दशो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

प्रथमव्याख्यायामुक्तोपासनावान्यागी देवतामन्ते प्रार्थयते—वायुरनिलमिति । द्वितीयव्याख्यायां त्वात्मज्ञस्याऽऽप्तकामत्वेन देहान्तेऽन्यत्र गमनं नास्त्याप्तकामो भवति । न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्ते ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेः । न च प्रार्थ्यं देवतान्तरं य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीति श्रुतेस्तस्य सर्वात्मकत्वादसंकल्पत्वाच्च । तमक्रतुः पश्यति वीतशोक इत्युक्तत्वात् । अत आत्मज्ञवन्नान्यस्यात्रैव कृतकृत्यतेति निदर्शयितुं सिंहावलोकनन्यायेन पूर्वोक्तव्याकृताव्याकृतोपासनावान्देवतान्तरोपासनावांश्च लोकान्तरगमनयोग्यो योगी देवतामन्ते प्रार्थयेतेति श्रुतिरुपदिशति—वायुरिति । मम वायुः शरीरस्थः प्राणः प्राणोपलक्षितं लिङ्गशरीरमुत्क्रान्तं सदमृतं मृत्युनाऽनाप्तं तानि मृत्युः श्रमो भूत्वोपयेम इति प्रक्रम्याथेममेव नाऽऽप्नोद्योऽयं मध्यमः प्राण इति श्रुतेः । अनिलं सूत्रात्मानं प्राप्नोत्विति शेषः । यदा वै पुरुषोऽस्माल्लोकात्प्रैतीत्यादिना वायोरेव परलोकप्रापकत्वोक्तेः । अथेदं स्थूलं शरीरं भस्मान्तं भस्मैवान्तः परिणामो यस्य तादृशं पृथिव्यंशत्वादत्रैव तिष्ठत्विति तात्पर्यम् । ओमिति ब्रह्मनाम । अवति प्राप्नोति सर्वान्पदार्थानथवाऽवति रक्षति सर्वं भूतजातम् । अथवाऽवति दीप्यत इति स्वयंप्रकाशं ब्रह्म । ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृत इति गीतावाक्यात् । तद्रूप क्रतो क्रतुर्यज्ञः । तद्धेतुत्वात्संकल्पोऽपि क्रतुः । यथा क्रतुर्भवति तत्कर्म कुरुत इति श्रुतेः । हे संकल्प स्मर । यन्ममेष्टं तत्स्मर । यं यं वाऽपि स्मरन्भावं त्यजत्यन्ते कलेवरम् । तं तमेवैति कौन्तेय सदा तद्भावभावित इति भगवद्वाक्यात्क्विबे कल्पते प्राप्तुं योग्यो भवतीति क्लिपक्किबिमागमश्छान्दसस्तस्मै क्किबे जशादेशोऽयस्मयादित्वेन पदत्वात् । मया प्राप्तुं

योग्याय लोकाय क्रियार्थोपपदस्येति कर्मणि चतुर्थी तं दातुं स्मर स्मरणाविषयं कुरु कृतं यन्मया बाल्यप्रभृत्यनुष्ठितं तत्स्मर स्मरेत्यस्य त्रिरावृत्तिः संभ्रमेण प्रवृत्तत्वात् ॥ १५ ॥ अत्रायं संग्राहकः श्लोकः—

सूत्रं मरुद्यातु वपुर्ममेदं भस्मान्तमुर्वी प्रणवात्मकस्त्वम् ।
संकल्प्य यत्कर्म कृतं मयेष्टं प्राप्यं च लोकं मम संस्मराद्य ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
पूर्णः पञ्चदशो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

अथ कर्मकृत्सर्वाश्रमेषु परिचरितमग्निं प्रार्थयते—अग्ने नयेति। हे देव दीव्यति दीप्यत इति देवो द्योतनात्मकाग्नेऽस्मांस्त्वदुपासकान्सुपथा गतागतरहितेन मार्गेण राये भोग्याय फलाय मुक्तिरूपाय तादर्थ्ये चतुर्थी तदर्थं नय प्रापय। यतो भवान्विश्वानि सर्वाणि वयुनानि ज्ञानानि कर्माणि वा विद्वाञ्जानन्। किंच जुहुराणं हुर्छेः सनो लुक्छलोपश्चेति सिद्धं कौटिल्यं वञ्चनात्मकं व्यवहारार्थमाचरितमेनः पापमस्मदस्मत्तो युयोध्यमिश्रितं कुरु नाशयेत्यर्थः। अमिश्रणार्थकाद्युधातोरादादिकादपि बहुलं छन्दसीति श्लुर्ङितश्चेति हेर्धिर्वा छन्दसीत्यपिच्चविकल्पान्ङित्त्वाभावेन गुणः। निष्पापत्वे मुक्तियोग्यत्वं स्यादिति भावः। यतोऽधुना वयं नमस्कारमपि कर्तुमशक्ताः शरीरापाटवात्किमुतान्यपरिचर्यामतस्ते तव भूयिष्ठां बहुतरां नमउक्तिं नमस्कारवचनं विधेमोत्तमपुरुष आशीर्लिङो बहुवचनं छन्दस्युभयथेति सार्वधातुकत्वमङ्ङालोपः क्रियाम। नमस्कारेण वै खल्वपीति वचनान्नमोऽस्तु नमोऽस्त्विति ब्रूम एतावतैव त्वं प्रसन्नो भवेति तात्पर्यम् ॥१६॥ अत्रायं संग्राहकः श्लोकः—

ज्ञानानि सर्वाणि विदंस्त्वमग्ने संप्रापयास्मान्सुपथा विमुक्तिम् ।
कौटिल्यमेनः कुरु नः पृथक्त्वं कुर्मो नमोऽन्ते बहुधा स्ववाचा ॥ १ ॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
संपूर्णः षोडशो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

अथ पुनरादित्यान्तर्यामिपुरुषोपासनामभेदेन वर्णयन्नैकात्म्यमुपसंहरति—हिरण्मयेनेति। हिरण्मयेन हिरण्यस्य विकारो हिरण्मयं तदिव प्रकाशात्मकं तेन पात्रेण पिबन्ति रश्मयो रसान्यत्र स्थितास्तेन बिम्बेन सत्यस्य। सत्यस्य सत्यमिति श्रुतेर्ब्रह्मणो मुखं मुखमिव मुखं प्रधानं रूपमपिहितमाच्छादितं सर्वजनैरज्ञातमस्ति। तथाऽपि यः प्रसिद्धोऽसौ प्राकृतजनानां परोक्ष आदित्ये सूर्यमण्डले स्वयंप्रकाशः सकलशक्त्याधारभूतः पुरुषः स वा अयं पुरुषः सर्वासु पूर्षु पुरिशय इति श्रुतेः। अन्तर्याम्यस्ति स पुनरसावित्यनेनावधारणं स एव।

अथवैतच्छब्दार्थोऽदःशब्दः । एष सर्वसमीपतरोऽहमिति प्रत्यक्षतः स्वानुभवं श्रुतिरधिकारिणे प्रदर्शयति । स यश्चायं पुरुषे यश्चासावादित्ये स एक इति श्रुतेः । ॐ ॐकारवाच्यं खमाकाशमिव व्यापकं ब्रह्माहमस्मीति भावः । एवमेव त्वमपि ब्रह्मरूपोऽसीति तात्पर्यम् ॥ १७ ॥ अत्रायं संग्राहकः श्लोकः—

तेजोमयेनापिहितं स्वरूपं सत्यस्य बिम्बेन सदा परं तु ।
भानावसौ यः पुरुषोऽस्ति सोऽहं ज्ञेयं विभु ब्रह्म सदोंस्वरूपम् ॥१॥
ईशावास्यस्य विवृतौ कृतायां रामशर्मणा ।
पूर्णः सप्तदशो मन्त्रः प्रीयतां तेन राघवः ॥ २ ॥

माध्यंदिनेशोपनिषद्रहस्यप्रकाशकं श्लोकसमूहमेतम् ।
कृत्वाऽर्पितं श्रीगुरुपादपद्मे पठत्यजस्रं स विमुक्तिमीयात् ॥ १ ॥
ईशाख्योपनिषद्रहस्यविवृतिं श्रीरामशर्माऽकृत
श्रीकृष्णात्रिकुलोद्भवः कविवरः श्रीसिद्धराजात्मजः ।
शाके खटगुणाचलावनि १७३९ मिते यामीश्वरेऽब्दे मधौ
सेयं श्रीरघुवीरपादकमले भक्त्याऽर्पिता श्रीमति ॥ २ ॥

इति श्रीमद्विद्वन्मुकुटालंकारहीरश्रीराजयोगिवरिष्ठश्रीसिद्धेश्वरसूरिसूनुना श्रीरामचन्द्रपण्डितेन विरचिता श्रीमाध्यंदिनीयेशावास्योपनिषद्रहस्यविवृतिः समाप्तिमगमत् ॥

॥ ॐ तत्सत् ॥

आनन्दभट्टोपाध्यायकृतमीशावास्यभाष्यम् ।

ॐ दर्शपूर्णमासाद्यश्वमेधान्तं कर्मकाण्डं समाप्तमथेदानीं ज्ञानकाण्डं प्रस्तू-
यते—ईशा वास्यमिति । ईशा वास्यमित्यादीनां मन्त्राणामपि यथाकथंचन
कर्मसु विनियोगः किं न स्यादिति केनचित्पृष्ट ऋचा पुरुषं ब्रह्माणं दक्षिणतः
पौरुषेण नारायणेनाभिष्टौति सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपादित्यनेन
षोडशर्चेनेत्यादि । तत ईशा वास्यमित्यादिमन्त्राणां कर्मसु प्रमाणतोऽविनियो-
गात् । यागकल्पनायां तु विशेषं परिहृत्यैव यागकल्पना सा भवति नेतरेति
श्रीभगवच्छंकराचार्यो विरोधादेवाविनियोगस्तेषां मन्त्राणां कर्मणीति प्रति-
पादयति—ईशा वास्यमित्यादयो मन्त्राः कर्मस्वविनियुक्तास्तेषामकर्मशेषस्याऽऽ-
त्मनो याथात्म्यप्रकाशकत्वादिति । तमेवं सविस्तरं प्रतिपादयति—याथात्म्य-
मात्मनः शुद्धत्वापापविद्धत्वाशरीरत्वादि वक्ष्यमाणं कर्मणा विरुध्यत इत्यतो
युक्तस्तेषां कर्मस्वविनियोगः । न चैवंलक्षणत्वं याथात्म्यमुत्पाद्यं संस्कार्यं
कर्तृत्वं भोक्तृत्वं येन कर्मशेषता स्यात् । सर्वासामुपनिषदामात्मयाथात्म्यनि-
रूपणेनैवोपयोगाद्गीतानां मोक्षधर्माणां चैतत्परत्वात् । तस्मादात्मनोऽपृथक्त्वा-
कर्तृत्वादि शुक्लत्वादि नोपादाय तस्य लोकबुद्धिसिद्धानि कर्माणि विहितानि ।
यो हि दृष्टेन कर्मफलेन ब्रह्मवर्चसा वाऽदृष्टेन स्वर्गादिना वाऽनुमीयते । तत्र च
द्विजातिरहं लक्षणाद्यधिकारधर्मवानित्यात्मानं मन्यते । सोऽधिक्रियते कर्मस्वि-
त्यधिकारविदो वदन्ति । तस्मादेते मन्त्रा ह्यात्मनो याथात्म्यप्रकाशनेनाऽऽत्मवि-
षयाः । स्वात्मविकाराज्ञानं निवर्तयन्तः शोकमोहादिसंसारविच्छित्तिसाधन-
मात्मैकत्वादिविज्ञानमुत्पादयन्ति । एवमुक्तविषयसंबन्धप्रयोजनान्मन्त्रान्संक्षे-
पतो व्याख्यास्यामः । अस्य कृत्स्नस्याध्यायस्य दध्यङ्ङाथर्वण ऋषिः ।
आत्मा देवता प्रतिमन्त्रं चेशावास्यं कुर्वन्नेवासुर्यानामेति तिस्रोऽनुष्टुभ
आत्मदेवत्या दध्यङ्ङाथर्वण ऋषिः । अत्र च कंचन पुत्रं शिष्यं वा गर्भा-
धानादिभिः संस्कारैः संस्कृतशरीरमधीतवेदमुत्पादितपुत्रमिह जन्मनि जन्मा-
न्तरे वा यथाशक्त्यनुष्ठितयज्ञादिना क्षपितकल्मषं नित्यानित्यवस्तुविवेक-
वन्तं दैववशात्कथंचिदिहामुत्रार्थफलभोगविरागयुक्तं शमदमादिसंपन्नं मुमुक्षुं
शिक्षयति । स्वयमाचार्यस्वरूपा सती श्रुतिराह—ईशा वास्यमिति । ईश ऐश्व-
र्येऽस्य क्विबन्तं तृतीयान्तं रूपमीशेतीष्ट इतीट् तेनेशेशित्रेशा तेन पर-

मेश्वरेण परमात्मना सर्वजन्तूनामात्मभूतेन स्वेनाऽऽत्मनेशा वास्यं वसनिवासे वास्यं निवसनीयं किमितीदं प्रत्यक्षादिभिः प्रतीयमानं साक्षिदृश्यं चेदमात्मव्यतिरिक्तं सर्वमिदमीशा वास्यं सर्वेषु स्वकार्येषु स्वकारणभूते निवास्यम् । जगति पृथिव्यां जगत्यां जगत्युपलक्षिते जगति किंचेति चकारो भिन्नक्रमः । जगति व्यक्तं च लोकप्रसिद्धं वस्तुजातं तत्सर्वमीशा वास्यं निवास्यं स्वेनाऽऽत्मनानिवास्यम् । किंच वस आच्छादनेऽहमेवेदं सर्वमिति परमसत्यरूपेणेशा परमात्मनाऽनृतमिदं सर्वं वास्यं छादनीयमाच्छादनीयं कार्यस्य कारणसत्ताप्रकाशव्यतिरेकेणाऽऽरोपितस्याधिष्ठानप्रकाशव्यतिरेकेण पृथक्सत्ताप्रकाशनाभावादेवेदं सर्वं जगदीशा वास्यम् । यतः प्रत्यगात्मनः सच्चिदानन्दलक्षणपुरुषार्थरूपं स्वत एव सिद्धम् । तेन स्वस्मिन्नारोपितस्याहमिदं ममेदमित्येवमनात्मकस्य सर्वस्यानर्थभूतस्य जगतस्त्यक्तेन त्यागेन सर्वाधिष्ठानभूतस्वस्वरूपयाथात्म्यानुभवसामर्थ्यसिद्धेन त्यक्तेन त्यागेनाऽऽत्मानं भुञ्जीथाः । भुजोऽनवन इत्यस्य रूपम् । पालनेऽपि च्छन्दस्यात्मनेपदं भवत्यत आत्मानं भुञ्जीथाः पालयेथाः कृतं कृत्यं प्राप्तं प्रापणीयम् । आत्मलाभान्न परं विद्यत इति श्रुतेः । एवं त्यक्तेषणस्त्वं मा गृधः कस्यस्विद्धनम् । गृधु अभिकाङ्क्षायाम् । कस्यस्वित्परस्य धनं मा गृधः । अभिकाङ्क्षां मा कार्षीर्धनविषयाभिकाङ्क्षां मा कार्षीरित्यर्थः । स्विदिति निपातो वितर्कवचनः । अस्य संपूर्णकामत्वादेवान्यार्थविषयाकाङ्क्षा किंतु कर्तव्या न कर्तव्येत्यर्थः । विचार्यमाणे तथाविधस्यार्थस्याभावादेवाथवा मा गृधः कस्यचिद्धनमित्याक्षेपार्थो न कस्यचिद्धनमस्ति यद्गृध्येत । आत्मैव सर्वमितीश्वरभावनया सर्वं द्वैतमात्रं त्यक्तमत आत्मन एवेदमात्मन एव तु सर्वं परस्य कस्यचित्संबन्धित्वेन प्रतीयमानस्य स्वयं संबधित्वमापादयितुमभिकाङ्क्षां मा कार्षीः स्वव्यतिरेकेणातो मिथ्याविषयं ग्रहं मा कार्षीरित्यर्थः । एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनाऽऽत्मज्ञाननिष्ठतयाऽऽत्मा रक्षितव्य इत्येष वेदार्थः । ॥ १ ॥

अथैतस्यार्थस्य ग्रहणस्य तु साधनत्वेनेदमुपदिशति—कुर्वन्नेवेहेति । इह कर्मभूमौ शतं समाः शतं वर्षाणि जिजीविषेद्यदि भवाञ्जीवितुमिच्छेत्तर्हि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव भवाञ्जिजीविषेच्छतं समा इति जीवतः पुरुषस्य जीवितं परमायुरनूद्य कुर्वन्कर्माणीत्यवधीयते । एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे नराभिमानिनि त्वयि । एवं जीवति सति कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः । नान्यथेतोऽस्ति । इतोऽस्माद्यथोक्तप्रकारादन्यथा प्रकारान्तरं नास्ति । एको ज्ञानमार्गो द्वितीयः कर्ममार्ग एवं

प्रकारद्वयादन्यत्प्रकारान्तरं नास्तीत्यर्थः । देवताभक्तिरप्युभयात्मिकैव । अतो न विरोधः । एवं चेदशुभं कर्म न लिप्यते । केचिदेवं योजयन्ति—इह लोके कर्माणि यज्ञेन दानेनेत्यादिना मुक्तिसाधनत्वेन विहितानि कर्माणि कुर्वन्नेव शतं समाः संवत्सराणि जिजीविषेदिति व्यत्ययः । एवमिहैवं त्वयि वर्तमाने सति तव मुक्तिरस्त्विति शेषः । नान्यथेतोऽस्ति । इतः प्रकारादन्यथा मुक्तिर्नास्तीत्येतदुक्तं भवति । यथा स्वर्गप्राप्तेर्नानाभूता विशेषास्तथा मुक्तेर्न मार्गभेदोऽस्त्यपि त्वेक एव मार्गो ज्ञानलक्षणः कर्म लिप्यते नास्ति येन प्रकारान्तरेण विद्यमानेन कर्म लिप्यते तथा प्रकारान्तरं नास्तीत्यर्थः । अतः शास्त्रविहितान्यग्निहोत्रादीनि कर्माणि कुर्वन्नेव जिजीविषेदिति । कथं पुनरिदमवगम्यत आद्येन मन्त्रेण ससंन्यासज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेति ज्ञानकर्मणोर्विशेषोपरोधं पर्वतसर्षपवदेवोक्तं न स्मरसि किमित्याद्युक्तम् । यो जिजीविषेत्स कर्म कुर्वन्नेवेति । ईशा वास्यमिदꣳ सर्वं यत्किंच जगत्यां जगत् । तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्विद्धनमिति । तेन जीविते मरणे वा गृधिं मा कुर्वित्यरण्यमियादिति पदमतो न पुनरियादिति व्यासशासनात् । उभयोः फलभेदं च वक्ष्यति । इमौ द्वावेव पन्थानावनुनिष्क्रान्ततरौ भवतः । क्रियापथश्चैव पुरस्तात्संन्यासपथश्च तयोर्न्यास एवात्यरेचयदिति तैत्तिरीयके । द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तिश्च सुभाषित इत्यादि पुत्राय विचार्य निश्चितमुक्तं श्रीवेदव्यासेन वेदाचार्येण । श्रीभगवता—लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ । ज्ञानयोगेन सांख्यानां कर्मयोगेण योगिनामिति । विभागं चानयोर्दर्शयिष्यामः ॥ २ ॥

अथेदानीमविद्वन्निन्दाऽऽरभ्यते विद्वत्प्रशंसार्थम्—असुर्या नाम त इति । परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसुरा असुषु रमन्त इति । तेषां संभूता लोका असुर्या नामशब्दः प्रसिद्धवचनस्ते लोकाः कर्मफलानि जन्मानि येषु लोक्यन्ते दृश्यन्ते भुज्यन्त इति । अन्धेनादर्शनात्मकेन तमसाऽज्ञानलक्षणेनान्धकारेणाऽऽवृता आच्छादितास्तान्स्थावरांस्ताँल्लोकांस्ते प्रेत्य मृत्वेमं देहं परित्यज्याभिगच्छन्ति । यथाकर्म यथाश्रुतं ते तान्गच्छन्ति । ते क इति तानाह—ये के चाऽऽत्महनो जना इति । आत्मानं घ्नन्तीत्यात्महननमात्मभेददर्शनं तत्कुर्वन्ति ते केऽविद्वांसः स्वस्वरूपाविदस्तद्विपर्ययेण विद्वांसो मुच्यन्ते न त्वात्महनः ॥ ३ ॥

तर्हि तत्कीदृशमात्मतत्त्वमिति तदाह—अनेजदेकमिति । आत्मदेवत्या त्रिष्टुप् । अतिवेगवान्वायुः प्रसिद्धस्ततो हि वेगवत्तरं मनस्ततोऽप्य-

तिवेगवत्तरमात्मतत्त्वं कथं विरुद्धमिदमुच्यते निश्चलं जवीय इति। नैष दोषो निरुपाध्युपाधिमत्त्वोपपत्तेः। तत्र निरुपाधिस्वरूपेणोच्यते—अनेजदेकमिति। सोपाधिस्वरूपेणोच्यते—मनसो जवीय इति। मनसो-जवेनान्तःकरणस्य संकल्पादिलक्षणस्योपाधेरनुवर्तमानात्तत्र प्रवृत्तिश्च व्यर्थं पुरतः पुरतश्चाऽऽत्मतत्त्वं प्रकाशत इति ज्योतिर्ब्राह्मणे प्रसिद्धम्। इहैव दुःस्थस्य मनसो ब्रह्मलोकादिदूरसंकल्पनं नानागमनं क्षणमात्रादित्यतो मनसो जविष्ठत्वं लोके प्रसिद्धम्। तस्मिन्मनसि ब्रह्मलोकादिदूरं गच्छति प्रथमं प्राप्त इवाऽऽत्मचैतन्याभासो गृह्यते। अतो मनसो जवीय इत्याह—किंच नैनद्देवा आप्नुवन्निति। एतदात्मतत्त्वं देवा द्योतनसाधनत्वात्सर्वथाऽपि तदात्मतत्त्वं चक्षुरादीन्द्रियाणि देवा नाऽऽप्नुवन्न प्राप्नुवन्न विषयीकुर्वन्निति। प्रकाशविषयीकर्तुं वा श्रम एव ततस्तेभ्यो मनो जवीयः। मनोव्यवहारो व्यवहितत्वात्। नाऽऽभासमात्रमप्यात्मनो नैव देवतानां विषयो भवति यत्स्यान्मनसोऽपि पूर्वमर्षत्पूर्वमेव गतं व्योमवद्व्यापित्वात्। सर्वथाऽपि तदात्मतत्त्वं सर्वसंसारधर्मवर्जितं स्वेन नीरूपेणाविक्रियं सदुपाधिकृताः सर्वाः संसारविक्रिया अनुभवतीवाविवेकिनां मूढानामेकमनेकमिव प्रतिदेहं प्रत्याचक्षते स्वत इत्येतदाह—तद्धावत इति। तद्यत्प्रसिद्धमात्मतत्त्वं तद्धावतो दूरं गच्छतोऽन्यान्मनोवागिन्द्रियप्रभृतीनात्मविलक्षणानत्येत्यतीत्य गच्छतीव। इत्रार्थं स्वयमेव दर्शयति—तिष्ठदिति। तिष्ठत्स्वयं सदित्यर्थः। तस्मिन्नात्मतत्त्वे सति चैतन्यस्वभावे मातरिश्वा मातर्यन्तरिक्षे श्वयत इति मातरिश्वा सर्वप्राणभृक्क्रियात्मकः। यदा सर्वाणि कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि यत्सूत्रसंज्ञकं सर्वस्य जगतो विधारयितृ स मातरिश्वा। अपोऽप इति कर्मनाम। अपः कर्माणि प्राणिनां चेष्टालक्षणान्यग्न्यादित्यपर्जन्यादीनां ज्वलनदहनप्रकाशवर्षादिलक्षणानि यज्ञदानहोमादीनि दधाति स्थापयति विभजतीत्यर्थः। समष्टिव्यष्टिरूपो ह्यसौ वायुर्धारयतीति वा। भीषाऽस्माद्वातः पवत इत्यादि श्रुतिभ्यः। सर्वा हि कार्यकारणादिविक्रिया नित्यचैतन्यात्मस्वरूपे सर्वस्याऽऽदिभूते सत्येव भवन्तीत्यर्थः। न मन्त्राणां जामिताऽस्तीति पूर्वोक्तोऽर्थः॥ ४॥

कंचिद्विशेषं दर्शयन्नाह—तदेजति। यस्तु सर्वाणि भूतानि यस्मिन्सर्वाणि भूतानीत्यात्मदेवत्यास्तिस्रोऽनुष्टुभः। तदेजति। तद्यत्प्रकृतमात्मतत्त्वं तदेजत्युपाधित एजति चलति। तन्नैजति। तदेव त्वात्मतत्त्वमतो नैजति नैव चलति। अचलमेव सच्चलतीव भवतीत्यर्थः। तद्दूरे। वर्षकोटिशतैरप्यविदुषामप्राप्यत्वा-

तद्दूर एव । तत् उ एव अन्तिकेऽतिसमीपे विदुषामात्मत्वात्तदन्तिक एव । अत्यन्तसमीप एव न केवलं दूरेऽन्तिके तदन्तोऽस्य सर्वस्य जगतोऽन्तरात्मैव । एष त आत्मा सर्वान्तर इति श्रुतेः । अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदेव सर्वस्य बाह्यतो व्यापित्वादाकाशवन्निरतिशयसूक्ष्मत्वादतो ज्ञानघन एवेति शासनान्निरन्तरम् ॥ ५ ॥

यस्तु शोधिततत्त्वंपदार्थो मुमुक्षुः सर्वाणि भूतान्यव्यक्तानि स्थावरान्तानि चेतनाचेतनान्यात्मानं त्वामन्वन्वेति सदा पश्यत्यात्मव्यतिरिक्तानि न प्रपश्यति । अपि त्वात्मन्यात्मत्वेन पश्यतीत्यर्थः । सर्वभूतेषु चाऽऽत्मानं तेषु सर्वेषु भूतेषु चाऽऽत्मानमनुपश्यति तेषामपि भूतानामात्मानमात्मतत्त्वं न पश्यति यथाऽस्य कार्यकरणसंघातरूपमात्मानं सर्वप्रत्ययसाक्षिभूतं सत्यं केवलम् । निर्गुणोऽनेनैव स्वरूपेणाव्यक्तानां स्थावरान्तानामहमेवाऽऽत्मेति सर्वभूतेषु चाऽऽत्मानं यस्तु पश्यति । ततस्तस्माद्दर्शनान्न विजुगुप्सते जुगुप्सां घृणां न करोति गुपू रक्षणे देहादिकं गोप्तुं न गच्छतीति वा । ज्ञानप्राप्तस्यैवानुवादोऽयम् । सर्वा हि घृणाऽऽत्मनोऽन्यद्दुष्टव्यं पश्यतो भवति । आत्मानमेव त्वनन्तेषु विशुद्धं निरन्तरं पश्यतो न प्राणादिनिमित्तमस्तीति प्राप्तमेव ततो न विजुगुप्सत इति ॥ ६ ॥

इममेवार्थमन्योऽपि मन्त्र आह । सर्वासां श्रुतीनामत्रैव तात्पर्यमिति प्रदर्शयितुम्—यस्मिन्सर्वाणि भूतानीति । यस्मिन्यथोक्त आत्मनि सर्वाणि भूतानि तान्येव भूतानि परमार्थदर्शनादात्मैवाभूदात्मैव संवृत्तः । परमार्थतो विजानत एवमात्मतत्त्वं विजानत एतत्तस्मिन्काले तस्मिन्नवस्थाविशेषे तत्र चाऽऽत्मनि को मोहः । मुह वैचित्ये को मोहः कः शोकः कः संसार एकत्वमनुपश्यतः । शोकमोहौ कामबीजमजानतो भवति न त्वात्मैकत्वं विशुद्धं गगनोपमं पश्यतः । को मोहः कः शोक इति । शोकमोहयोरविद्याकार्ययोः संसारमसंसारमित्यज्ञानयोराक्षेपेण संप्रदर्शनात्सकारणस्य संसारस्यात्यन्तमेवोच्छेदः प्रदर्शितो भवति ॥ ७ ॥

योऽयमतीतेन मन्त्रेणोक्त आत्मा किंलक्षण इत्यपेक्षायामयं मन्त्रः प्रवर्तते—स पर्यगादिति । आत्मदेवत्या जगती । स यथोक्त आत्मा पर्यगात्परितः समन्तादगात्परितो गच्छति सर्वमवगच्छति व्याप्नोति च । आकाशवद्व्यापी शुक्रं शुच दीप्तौ शुचिमद्दीप्तिमदित्यर्थः । अकायमशरीरं लिङ्गशरीरवर्जितमव्रणमक्षतम् । अस्नाविरं स्नावाः शिरा न विद्यन्ते यस्य तदस्नाविरं कविः क्रान्तदर्शी नान्योऽतोऽस्ति द्रष्टेत्यादिश्रुतेः । मनीषी मनस ईशिता सर्वज्ञ ईश्वर

इत्यर्थः । परिभूः सर्वेषामुपरि भवतीति परिभूः । स्वयमेव भवतीति स्वयंभूः । एषामुपरि भवति यश्चोपरि भवति स स्वयमेव सर्वो भवतीति स्वयंभूः । स नित्यमुक्त ईश्वरः । याथातथ्यतो यथातथा भावो याथातथ्यं यथाश्रुतकर्मफलसाधनतोऽर्थान्कर्तव्यपदार्थान्व्यदधाद्करोद्विहितवान्यथानुरूपं व्यधादित्यर्थः । शाश्वतीभ्यः समाभ्यः संवत्सरात्मभ्यः प्रजापतिभ्य इत्यर्थः । अत्राऽऽद्येन मन्त्रेण सर्वैषणापरित्यागाज्ज्ञाननिष्ठोक्ता । प्रथमो वेदार्थः । ईशा वास्यमित्यादिना मा गृधः कस्यस्विद्धनमिति । अज्ञानिनां जिजीविषूणां ज्ञाननिष्ठासंभवे सति कुर्वन्नेव कर्माणि जिजीविषेज्जिजीविषेरिति कर्मनिष्ठा । द्वितीयो वेदार्थः । अनयोश्चिरंतनयोर्मन्त्रः प्रदर्शितः—सोऽकामयत जाया मे स्यादिति तस्याज्ञानिनः कर्माणि । मन एवास्याऽऽत्मा वाग्जायेत्यादिवचनात् । अज्ञत्वं कामित्वं च निश्चितमवगम्यते । तथाचाऽऽत्मस्वरूपावस्थानं जायाद्येषणासंन्यासेनाऽऽत्मविदा कर्मनिष्ठाप्रातिकूल्येनाऽऽत्मस्वरूपनिष्ठैव दर्शनात् । किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इत्यादिना यज्ज्ञाननिष्ठासंन्यासिनस्तेऽसुर्या नाम त इत्यादिनाऽविद्वन्निन्दाद्वारेणाऽऽत्मनः स पर्यगादिति वदतो मन्त्रैरुपादिष्टो? यत्र तत्राधिकृता न कामिन इति । यथा च श्वेताश्वतराणां मन्त्रोपनिषदि—अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमित्यादि विभज्योक्तम् । ये तु कर्मनिष्ठाः कर्म कुर्वन्त एव जिजीविषवस्तेभ्य इदमुच्यते—अन्धं तम इत्यादिना । कथं पुनरिदमवगम्यते साध्यसाधनभेदोपमर्शनम् । यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः । तत्र को मोहः कः शोक एकत्वमनुपश्यतः । यदात्मैकत्वविज्ञानं तत्र केनचिदपि कर्मणा ज्ञानान्तरेण वा स मूढः समुच्चिचीषति । भवतु समुच्चिचीषयाऽविद्वन्निन्दा । तत्र च यस्य येन समुच्चयः संभवति न्यायतः शास्त्रतो वा तदिहोच्यते । दैवं वित्तं देवतादिज्ञानं कर्मसंबन्धित्वेनोपन्यस्तेन परमात्मविज्ञानं विद्यया देवलोक इति पृथक्फलाश्रयणात्ततो ज्ञानकर्मणोरिहैकैकानुष्ठाननिन्दा समुच्चिचीषया निन्दापरैकैकस्य पृथक्फलाश्रयणाद्विद्यया तदारोहन्ति विद्यया देवलोकः । तत्र दक्षिणा यन्ति कर्मणा पितृलोक इति । न हि शास्त्रविहितं किंचिदकर्तव्यतामियात् ॥ ८ ॥

अन्धं तमः प्रविशन्ति । षडनुष्टुभः । आत्मदेवत्याः । अन्धं तमोऽदर्शनात्मकं तमः प्रविशन्ति । के येऽविद्यामविद्या कर्मेत्यर्थः । अविद्यामग्निहोत्रादिलक्षणामेव केवलामुपासते । तत्पराः सन्तोऽनुतिष्ठन्तीत्यभिप्रायः । ततो भूय इव ते तमः । ततस्तस्मादन्धात्मकाद्भूय एव बहुतरमेव तमः प्रविशन्ति ते

क इति । य उ विद्यायां रता ये तु कर्म हित्वा य उ एव विद्यायामेव रता ज्ञान एव रतास्ततो बहुतरमेव तमः प्रविशन्ति । अनन्दा नाम ते लोका अन्धेन तमसाऽऽवृताः । तांस्ते प्रेत्याभिगच्छन्ति अविद्वांसोऽबुधा जना इति श्रुतेः ॥ ९ ॥

अत्रावान्तरफलभेदं विद्याकर्मणोः समुच्चये कारणमाहान्यथा फलवदफलवतोः संनिहितयोरङ्गाङ्गितैव स्यादिति—अन्य देवाऽऽहुरिति अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुः । अन्यदेवाऽऽहुरविद्यया कर्मणाऽन्यदेव फलं क्रियत इत्याहुर्वेदाः कर्मणा पितृलोको विद्यया देवलोक इत्यादयः । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनं शुश्रुमः । य आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इत्यर्थः ॥ १० ॥

यत एवं विद्यां चाविद्यां चेति देवताज्ञानं कर्म चेत्यर्थः । यस्तद्वेद तदुभयं ज्ञानं कर्म च सहैकेन रूपेणानुष्ठेयं यो वेद तस्यैव समुच्चयकारिण एकपुरुषार्थसंबन्धक्रमेण किं स्यादित्युच्यते—अविद्यया मृत्युं तीर्त्वेति । अविद्यया कर्मणाऽग्निहोत्रादिना मृत्युं स्वाभाविकं रागतः क्रियमाणं कर्म ज्ञानं च मृत्युशब्दवाच्यं तदुभयं तीर्त्वाऽतिक्रम्य विद्यया वेदान्तज्ञानेनामृतं देवतात्मभावमश्नुते व्याप्नोति । तद्वदत्रामृतमश्नुते यद्देवतात्मगमनम् ॥ ११ ॥

अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते—अन्धं तम इति । अन्धं तमः प्रविशन्ति के येऽसंभूतिं संभवनं संभूतिः सा यस्य कार्यस्य संभूतिस्तस्या अन्याऽसंभूतिः प्रकृतिः प्रक्रियते कार्यं यया प्रकृतिः कारणमव्याकृताख्यां तामसंभूतिमव्याकृताख्यां प्रकृतिकारणमविद्यां कामकर्मबीजभूतामदर्शनात्मिकामुपासते ते तदनुरूपमेव फलं तमोऽदर्शनात्मकं प्रविशन्ति । ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशन्ति । के ये उ एव संभूत्यां रताः संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्य एव रतास्ते ततो भूय इव तमः प्रविशन्ति ॥ १२ ॥

अथाधुनोपासनयोः समुच्चयकरणायावयवफलभेदमाह—अन्यदेवाऽऽहुरिति । अन्यदेव पृथगेवाऽऽहुः फलं संभवात्संभूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं फलमाहुर्वेदाः । तथाऽन्यदाहुरसंभवादसंभूतेरव्याकृतादव्याकृतोपासनादन्यदेव फलमाहुः । अन्धं तमः प्रविशन्तीति शुश्रुम । श्रुतवन्तो वयं धीरा ये नस्तद्विचचक्षिरे । य आचार्या धीराणां वचनं विचचक्षिरे । व्याकृताव्याकृतोपासनाफलवचनं व्याख्यातवन्त इत्यर्थः ॥ १३ ॥

यत एवमतः समुच्चयः संभूत्योर्युक्त एवैकपुरुषार्थत्वादित्याह—

संभूतीं च विनाशं च यस्तद्वेदोभयꣳ सह विनाशेन मृत्युर्नाशो धर्मो यस्य स तेन विनाशधर्मणा हिरण्यगर्भोपासनेनैश्वर्यप्राप्तिद्वाराऽनैश्वर्यधर्मकामादिदोषजातं च मृत्युं तीर्त्वा संभूत्या। अत्राकारलोपश्छान्दसः। असंभूत्याऽसंभूत्युपासनयाऽव्याकृतोपासनेनामृतं प्रकृतिलयलक्षणं कारणत्वप्राप्तिलक्षणममृतमश्नुत इति ततश्च पुनः संसारो भवतीत्येवमपरं विद्याकर्मसमुच्चये फलमभिहितम्। तत्र को मोहः कः शोक एकत्वमनुपश्यत इति। स्वतन्त्रस्य सर्वकर्मसंन्यासपूर्वस्य सम्यग्ज्ञातस्य फलमभिहितमेवं द्विःप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽनेन प्रकाशितः। प्रवृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यान्तं ब्राह्मणमुपयुक्तम्। निवृत्तिलक्षणस्य प्रकाशने विद्यामुपासत इति। तत ऊर्ध्वं बृहदारण्यकं तत्रापि प्राणादिविषयोपासनं न परं किंचिदन्यन्निर्गुणब्रह्मपरमिति विभज्य दर्शनीयम्। कार्यं सगुणब्रह्मोपासनावाक्यजातं चान्धं तमः प्रविशन्ति येऽविद्यामुपासत इत्यादिषण्मन्त्रप्रकाशितार्थस्य प्रकाशन उपयुक्तमितरत्सर्वं निर्गुणतत्त्वैकनिष्ठमिति। विद्यां चाविद्यां च यस्तद्वेदोभयꣳ सह। अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुत इति यदुक्तं तत्र केन मार्गेणामृतत्वमश्नुत इत्यर्चिरादिमार्गेणेत्युच्यते ॥ १४ ॥

एवं यथोक्तोपासनं कुर्वन्नुपासकः स्वदेहस्यान्तकाले प्राप्त आत्मनोऽमृतत्वप्राप्तिद्वारभूतमादित्यं याचते—हिरण्मयेन पात्रेणेति। आदित्यदेवत्याऽनुष्टुब्हे पूषन्हे सूर्यास्मत्पोषक हिरण्मयेन ज्योतिर्मयेन पात्रेणाऽऽधारभूतेन सत्यस्याऽऽदित्यमण्डलस्थस्य ब्रह्मणोऽपिहितं मुखं द्वारमपिहितम्। हिरण्मयेन पात्रेण द्वारस्यापिधानं कृतम्। अतस्तत्त्वं पूषन्नपावृणु पूर्वस्तत्पिधानं त्वमपावृण्वपगमय। सत्यधर्माय सत्यस्य तवोपासनादहमपि सत्यधर्मो जातः। सत्यं धर्मो यस्य स सत्यधर्मा तस्मै सत्यधर्माय मह्यं तदपावृणु। यद्वा व्यत्ययः। सत्यधर्माय सत्यधर्मस्य तद्दृष्टये ॥ १५ ॥

पूषन्नेकर्ष इति। सूर्यदेवत्या त्रिष्टुप्पोषणात्पूषा रविस्तत्संबोधनं हे एकर्षे त्वया सर्वस्य संयमनाद्यमो हे यम सूर्य सुष्ठीरणात्सूर्यस्तत्संबोधनं प्रजापतेरपत्यं प्राजापत्यस्तत्संबोधनं हे प्राजापत्यैवं संस्तूय प्रार्थयते—व्यूह रश्मीनिति। रश्मीन्व्यूह विगमय समूह तेजस्तेजस्तापकं यज्ज्योतिस्तज्ज्योतिस्तत्समूहमेकी कुरु। यत्ते रूपं कल्याणतमं तत्ते पश्यामि। ते तव यत्कल्याणतमं मङ्गलतमं रूपम्। तत्ते तव प्रसादात्तद्रूपमहं पश्यामि। किंच योऽसावसौ पुरुषः सोऽहमस्मि। योऽसौ मण्डलस्थो व्याकृतावयवो यः पुरुषः

पुरुषा आहुः पूर्णत्वाद्वा पुरुषः सोऽहमस्मीत्यादित्यमेकीकृत्य पश्यामीति॥१६॥

एवं ब्रह्मोपासकस्य योगिनः शरीरपातोत्तरकालं शरीरं यद्भवति तदाह—

वायुरनिलमिति । लिङ्गोक्तदेवत्यं यजुर्वायुः प्राणोऽनिलं सूर्यात्ममम्रृतमधिदैवतं स्वप्रकृतिं हिरण्यगर्भाख्यं प्राणं प्रतिपद्यते । अथानन्तरमिदं प्रतीयमानं शरीरमग्नौ हुतं भस्मान्तं भवति । कृतप्रयोजनत्वात् । इदानीं योगिनो बलभूतं प्रभूतं सर्ववेदसारं सर्ववेदमयमक्षरं कथ्यते—ओमित्यवतेराप्नोतेर्वा । ओमिति परमाक्षरस्य योगिनो बलभूतस्य परस्य ब्रह्मणः प्रणवाख्यस्य स्थूलादिगुणयुक्तस्य ब्रह्मा ऋषिश्छन्दो गायत्रं परमात्मा देवता । शब्दब्रह्मारम्भे विनियोगः । अपि च यागहोमादिषु शान्तिपौष्टिककर्मसु चान्येष्वपि काम्यनैमित्तिकादिष्वपि सर्वेष्वस्योंकारस्य विनियोगः । ओमिति परब्रह्मणो नामनिर्देशः । ओं तद्ब्रह्मेत्यादिश्रुतेः । ब्रह्मविष्णुशिवपरब्रह्मात्मकोऽकारोकारमकारार्धमात्रात्मकोऽयमोंकारएवान्त्यकाल उत्तारक इति दर्शयति आत्मरूपश्च ॐकारस्ततस्तेन ततम् । इदानीं कृतं स्मारयति—क्रतो स्मर इति । लिङ्गोक्तदेवत्यं यजुः । क्रतो क्रतुः संकल्पोऽनेन संकल्पविषयो योगिभिर्लक्ष्यते । हे क्रतो हे श्रीभगवन्नग्ने स्मर कृतं ब्रह्मचर्ये मया कृतं तत्स्मर न विस्मर्तव्यम् । हे क्रतो गार्हस्थ्ये मया यत्कृतं तच्च स्मर । पुनश्च यत्साधु कृतं तत्सर्वं कृतं स्मर कृतं स्मरेति । आदरार्थं पुनर्वचनम् । अथवा क्रतुशब्देन यज्ञः संबोध्यते हे क्रतो हे यज्ञ । यज्ञशब्दोपलक्षितो यज्ञाध्यक्षो यज्ञहविर्भागभुक्श्रीभगवान्विष्णुः संबोध्यते श्रीभगवान्विष्णो कृतं स्मर मया कृतं त्वया कारितं स्मर कृतं स्मर कृतं स्मर कृतं स्मरेति ॥ १७ ॥

मार्गं याचते—अग्ने नयेति । आग्नेयी त्रिष्टुप् । हे श्रीभगवन्नग्ने हे सर्वज्ञ नय सुपथा दक्षिणमार्गनिवृत्त्यर्थं सुशब्दः शोभनेन मार्गेण देवयानेनास्मान्नय प्रापय । राये धनाय कर्मज्ञानफलोपभोगाय वा । अस्मान्यथोक्तज्ञानकर्मकारिणो नयेति संबन्धः । हे देव विश्वानि सर्वाणि कर्माणि वयुनानि कर्माणि प्रज्ञानानि तदनुष्ठितानि च विद्वान्ज्ञानवांस्त्वं सुपथा नयेति संबन्धः । किंच—युयोध्यस्मज्जुहुराणमेनः । अस्मदस्मत्तः सकाशाज्जुहुराणं कुटिलं कुटिलवञ्चनात्मकमेनस्तत्कृतं चैनः पापं युयोधि योधय पृथक्कुरु । तत्ते विशुद्धाः सन्त इष्टं फलं प्राप्नुयामेत्यभिप्रायः । किंतु वयमिदानीं किमपि कर्तुं न शक्नुमः । अपि तु भूयिष्ठां बहुतरां नमउक्तिं नमस्कारवचनं ते तुभ्यं विधेम कुर्मः । केवलनमस्कारवचनेन परिचरेमेत्यर्थः ॥ १८ ॥

वन्देऽहं मङ्गलात्मानं भास्वन्तं वेदविग्रहम् ।
याज्ञवल्क्यं मुनिश्रेष्ठं कृष्णं हरिहरं प्रभुम् ॥ १॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यश्रीवासुदेवपुरीपूज्यपादपरमकारु-
ण्यासादितश्रीकृष्णभक्तिसाम्राज्यस्य श्रीमज्जातवेदभट्टोपाध्या-
यस्य सूनुना चतुर्वेदिश्रीमदानन्दभट्टोपाध्यायेन विरचिते
काण्ववेदमन्त्रभाष्यसंग्रहे चत्वारिंशोऽ-
ध्यायः ॥ ४० ॥

॥ ॐ तत्सत् ॥

अथानन्ताचार्यकृतमीशावास्यभाष्यम् ॥

सर्ववेदैकसंवेद्यं हरिं देवशिखामणिम् ।
देशतः कालतश्चैव गुणतोऽनन्तमाश्रये ॥ १ ॥
चत्वारिंशे त्विहाध्याये परमात्मनिरूपणम् ।
क्रियते शोकमोहादिवर्जितैः परलक्षणैः ॥ २ ॥

ईशा वास्यमित्यस्याध्यायस्य कर्मसु विनियोगो नास्ति । किंतु शुद्धत्वैकत्वापापविद्धत्वाशरीरत्वसर्वगतत्वाद्यात्मयाथात्म्यप्रतिपादकत्वम् । तस्माद्विहितकर्मणा शुद्धान्तःकरणस्याधिकारिण आत्मस्वरूपप्रकाशनेन शोकमोहादिसाधनमज्ञानं निवर्त्य स्वरूपं दर्शयतीत्यभिधेयसंबन्धप्रयोजनवानिति व्याख्यायते । ईशा वास्यमात्मदेवत्योऽनुष्टुप्छन्दस्कोऽध्यायो दध्यङ्ङाथर्वण ऋषिर्द्रष्टा । गर्भाधानादिसंस्कारसंस्कृतमधीतवेदं जनितसुतं यथाशक्तिकृतयज्ञं निष्पापं निस्पृहं यमनियमोपेतं मुमुक्षुमुपसन्नं शिष्यं पुत्रं वा ऋषिरुपदिशन्नाह—ईशेति । ईश ऐश्वर्ये क्विबन्त ईष्ट इतीट् । सर्वस्येशिता परमेश्वरः । स हि सर्वजन्तूनामात्मत्वात्सर्वमीष्टे । तेनाऽऽत्मनेशा परमेश्वरेणेदं सर्वं प्रत्यक्षप्रमाणसिद्धं विश्वं वास्यम् । वस आच्छादने । ऋहलोर्ण्यदिति ण्यत्प्रत्ययो णित्त्वात्स्वरितः । आच्छादनीयं सर्वं तेन व्याप्तमित्यर्थः । स एवाधस्तात्स एवोपरिष्टात् । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इत्यादिश्रुतेः । इयद्वा इदं सर्वमीशा परब्रह्मणा वास्यं वस निवासे वासितमुत्पादितं स्थापितं नियमितं च । यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति । यमयत्येष त आत्माऽन्तर्याम्यमृत इत्यादिश्रुतेः । न केवलं प्रत्यक्षगम्यमीशा वास्यमपि तु सावरणं ब्रह्माण्डमित्याह—यदिति । यत्किंचिच्छ्रुतिप्रमाणसिद्धं जगत्यां जगत् स्थावरजङ्गमात्मकं शेषं विश्वमीशेनोत्पादितं स्थापितं नियमितं चेत्यर्थः । अतः कारणात्तेनेशा त्यक्तेन विसृष्टेन दत्तेन स्वादृष्टानुसारिणा विषयेण भुञ्जीथा भोगाननुभवेः । इतोऽधिकं मा गृधो गृधु अभिकाङ्क्षायां मा काङ्क्षीः । इतो ममाधिकं भवत्विति धियं त्यजेत्यर्थः । परमात्माधीनत्वेन त्वादिच्छाया व्याहतत्वादिति भावः । एवं सद्धनं कस्यस्वित्स्विदिति निपातो वितर्के न कस्यापीत्यर्थः । स एष सर्वस्य वशी सर्वस्येशानः सर्वमिदं प्रशास्ति यदिदं किंचेत्यादिश्रुतेर्मुख्यदाता परमेश्वरो न स्वाभिसंबन्धालिङ्गितमन्यत्प्राणिजातमिति वैराग्येण भवितव्यमिति तात्पर्यम् ॥ १ ॥

इदानीं चित्तशुद्ध्यर्थं विहितमवश्यमनुष्ठेयमित्याह—कुर्वन्नेवेति । कर्माण्यग्निहोत्रादीनि निष्कामाणि मुक्तिहेतुकानि कुर्वन्नेवेह लोके शतं समाः शतवर्षपर्यन्तं जिजीविषेत् । पुरुषव्यत्ययः प्रकरणात् । त्वं जिजीविषेर्जीवितुमिच्छेः । भवाञ्जिजीविषेदिति वा । पुरुषायुषस्य शतवर्षमितत्वाच्छतग्रहणं कालाध्वनोरत्यन्तसंयोग इति द्वितीया । यावच्छक्ति कर्तव्यं न कदाऽपि त्याज्यमिति । कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणीति । ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा मनीषिणः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसेति भगवद्वचनात् । त्वयीति विभक्तिव्यत्ययस्तवैवं कर्म कुर्वतो जिजीविषतो मुक्तिरस्तीति शेषः । इतः प्रकारादन्यथा प्रकारान्तरेण मुक्तिर्नास्तीत्ययमभिप्रायः स्वर्गादिप्राप्तौ यथा नानोपायाः सन्ति न तथा मुक्तावित्यर्थः । ब्रह्मार्पणबुद्ध्या कृतकर्मणा शुद्धान्तःकरणस्यैव मुक्तिरिति भावः । ननु कर्मणोऽवश्यं फलेन भाव्यं कथं मुक्तिरित्याह—न कर्मेति । मुक्त्यर्थं क्रियमाणं कर्म नरे मनुष्ये त्वयि न लिप्यते न बध्यते । स्वोचितेनासंकल्पितफलेन कर्मणा भगवन्तमाराधयन्तं नरमपि त्वां न प्रागुत्तरकर्म बाधत इत्यर्थः । मुक्तिकारणान्तःकरणशुद्ध्यापादकत्वेनोपक्षीणशक्तित्वात् । उक्तं हि—द्वाविमावथ पन्थानौ यत्र वेदाः प्रतिष्ठिताः । प्रवृत्तिलक्षणो धर्मो निवृत्तौ च विभाषित इति ॥ २ ॥

अथ काम्यपरान्निन्दति—असुर्या इति । ये के च ये केचिज्जना आत्महन आत्मानं घ्नन्ति संसारे संबन्धयन्तीत्यात्महनोऽविद्वांसः काम्यकर्मपरा आत्महन्तारस्ते प्रेत्य मृत्वा ताँल्लोकानभिगच्छन्ति । अभिराभिमुख्ये ते के ये लोका असुर्या असुराणामिमेऽसुर्या असुषु प्राणेष्वेव रमन्त इत्यसुराः प्राणपोषणमात्रपरा अज्ञानिनः केवलविषयासक्तास्तैः प्राप्या असुर्याः कीदृशा अन्धेन तमसाऽज्ञानात्मकेन तमसाऽऽवृता आच्छादिता अज्ञानाधिक्यकारिणोऽनात्मज्ञाः पुनः पुनर्जायन्ते म्रियन्ते चेत्यर्थः । उक्तं हि भगवता श्रीगीतायाम्—कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयमिति । अनेकचित्तविभ्रान्ता मोहजालसमावृताः । प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचाविति । तस्माद्यथायोगं वर्णाश्रमविहितकर्मणा भगवन्तमाराधयंस्तत्प्रसादेन निवृत्तस्वान्तःकलुषो जातवैराग्य आत्मविन्मुक्तो भवतीति प्रघट्टकार्थः । ब्रह्मविदाप्नोति परं तमेवं विद्वानमृत इह भवति नान्यः पन्था अयनाय विद्यते ॥ ३ ॥

एवं त्वयि नान्यथेतोऽस्तीत्यादिश्रुतिभिर्ब्रह्मज्ञानमेव मोक्षसाधनमित्युक्तम् । तद्ब्रह्म किंविधमित्यत आह—

अनेजदिति । त्रिष्टुप्छन्दस्केयमृक्तद्ब्रह्म । अनेजत् । एजृ कम्पने नैजतीत्यनेजत् । अकम्पमानोऽभयमचलदिति केचित्तथात्वेन मनसो जवीय इत्युत्तरविरोधोऽजरोऽमृतोऽभयो ब्रह्मेति श्रुतेश्च । एकं समाधिकरहितम् । न तत्समश्चाभ्यधिकश्च दृश्यत इति श्वेताश्वतरोक्तेः । यद्वा सर्वभूतेषु विज्ञानघनरूपेणैकम् । एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मेतिश्रुतेः । मनसो-जवीयो मनो हि वेगवत्प्रसिद्धं ततोऽपि जवीयो वेगवत्तरं जवोऽस्यास्तीति जववदत्यन्तं जववदिति जवीय ईयसुनि कृते विन्मतोर्लुगिति मतुपो लुग्देहस्थस्य मनसो दूरस्थब्रह्मलोकादिसंकल्पनं क्षणमात्राद्भवतीति मनसो वेगवत्तरत्वं तस्याप्यगम्यत्वाद्ब्रह्म मनसो जवीय इत्युपपद्यते । किंच देवा ब्रह्माद्या अप्येनद्ब्रह्म नाऽऽप्नुवन्कात्स्न्येनाजानन् । देवा द्योतमानाश्चक्षुरादयोऽप्येनन्नाऽऽप्नुवन्न गोचरी कुर्वन्तीति केचित् । तत्तु मनोगम्यत्वादेवापीह स्थितम् । पूर्वं सर्वजगत्कारणम् । यतो वा इमानि भूतानि जायन्त इति श्रुतेः । अर्षत् ऋष गतौ, अर्षतीत्यर्षज्ज्ञानस्वरूपं सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुतेः । किंच लोकविलक्षणम् । लक्षणान्तरमाह—तिष्ठदिति । तिष्ठतीति तिष्ठत्स्वस्थाने स्थितमपि सर्वगतत्वाद्धावतो द्रुतं गच्छतोऽन्यान्मनआदीनत्येत्यतिक्रम्य तिष्ठत्यचिन्त्यशक्तिकमित्यर्थः । किंच मातरिश्वा मातर्यन्तरिक्षे श्वयति वर्धत इति मातरिश्वा वायुः । टुओश्वि गतिवृद्ध्योरितिधातुः । तस्मिन्ब्रह्मण्यपः कर्माणि दधाति धारयति । अप इति कर्मनाम कार्यकारणजातानि यस्मिन्नोतानि प्रोतानि यश्च सूत्रसंज्ञः सर्वस्य जगतो विधारयिता सर्वप्राणभृच्चेष्टकः सोऽपि वायुः प्राणिनां चेष्टालक्षणानि कर्माणि तस्मिन्ब्रह्मणि स्वाधिष्ठाने सति दधाति सर्वचेष्टको वायुस्तस्यापि चेतयितृ ब्रह्मेत्यर्थः । भीषाऽस्माद्वातः पवत इत्यादिश्रुतेः । यद्वा मातरिश्वा वायुरपः कर्माण्याप्यन्ते प्राप्यन्ते सुखदुःखानि याभिस्ता अपः कर्माणि । आप्नोतेर्ह्रस्वश्चेति क्विप् धातोर्ह्रस्वश्च । तानि कर्माणि यज्ञहोमादीनि यस्मिन्दधाति स्थापयति । सर्वप्राणिकर्माणि समर्पयतीत्यर्थः । देवा गातुविदो गातुं वित्त्वा गातुमितमनसस्पत इमं नो देवदेवेषु यज्ञ९ स्वाहा वाचि स्वाहा वातेधा इति समिष्टयजुर्मन्त्रे वायुस्थत्वोक्तेः सर्वकर्माणि तावद्वायौ स्थाप्यन्ते समष्टिव्यष्टिरूपोऽसौ वायुरपि तानि सर्वाणि तस्मिन्दधात्यतो यागहोमादीनां कर्मणां परमास्पदत्वं ब्रह्मलक्षणमित्यर्थः ॥ ४ ॥

रहस्यं सकृदुक्तं न चित्तमारोहतीति पूर्वमन्त्रोक्तमपि पुनर्वदति—तदिति । अनुष्टुप्तत्प्रकृतमात्मतत्त्वमेजति चलति तदेव नैजति च । स्वतो नैव बिभेति । अभयमेव सन्मूढदृष्ट्या बिभेति च यद्वैजतिरन्तर्भावितण्यर्थः ।

तदेजयति दुष्टांस्तदेव नैजयति सदाचारानिति शेषः। परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युग इति स्मृतेः। किंच तद्दूरे दूरदेशेऽस्ति तदु तदेवान्तिके समीपेऽप्यस्ति सर्वगतत्वात्। यद्वा तद्दूरेऽविदुषामब्दकोट्याऽप्यप्राप्यत्वाद्दूर इवेत्यर्थः। तद्वन्तिके विदुषां हृद्यव-भासमानत्वादन्तिक इव न केवलं दूरेऽन्तिकेऽस्ति। किंत्वस्य सर्वस्य नामरू-पक्रियात्मकस्य जगतोऽन्तरभ्यन्तरे तदेवास्ति। अस्य सर्वस्य बाह्यतो बहिरपि तदु तदेवास्त्याकाशवद्व्यापकत्वात्। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थित इति श्रुतेः। यद्वाऽस्य मन्त्रस्यार्थान्तरम्। पूर्वं कारणरूपमुक्तमिदानीं कार्य-रूपमुद्दिशति—तदिति। तदात्मतत्त्वमेजति सर्वजन्तुरूपेण स्थितं सच्चलति तदेव नैजति—स्थावररूपावस्थं न चलति तद्दूर आदित्यनक्षत्ररूपेण स्थित-त्वात्। तदु अन्तिके धरादिरूपेण स्थितत्वात्। अस्य सर्वस्य प्राणिजातस्या-न्तर्मध्येऽन्तर्यामिरूपेण स्थितं तदेव यो विज्ञाने तिष्ठन्विज्ञानादन्तरो यं विज्ञानं न वेद यस्य विज्ञानः शरीरं यो विज्ञानमन्तरो यमयतीति श्रुतेः। अस्य सर्वस्य जगतो बाह्यतस्तदु तदेव कालरूपेण विद्यमानत्वात्। अन्तर्बहिः पुरुषः कालरूप इति स्मृतेः। चेतनाचेतनरूपमनन्तं ब्रह्मैवेत्यर्थ एवमुपासितु-रर्चिरादिमार्गेण गमनं नास्ति। इहैव ब्रह्मप्राप्तिः। न तस्य प्राणा उत्क्रामन्त्य-त्रैव समवलीयन्ते। ब्रह्मैव सन्ब्रह्माप्येतीत्यादिश्रुतेः। तद्वन्तिक इत्यत्र उका-रोऽपृक्तोऽस्पर्शादिति प्रातिशाख्येन संधिः॥ ५॥

अथोपासनाप्रकारमाह—यस्त्विति। अनुष्टुब्यः पुनरधिकारी सर्वाणि भूतान्यव्यक्तादिस्थावरान्तानि चेतनाचेतनान्यात्मन्सप्तम्या लुगात्मन्ये-वानुपश्यति। ब्रह्मण्येव सर्वाणि भूतानि स्थितानीति जानाति। आत्मानं च सर्वभूतेष्वनुपश्यति। ततस्तस्माद्दर्शनान्न विजुगुप्सते। जुगुप्सां नाऽऽप्नोति मुक्तो भवतीत्यर्थः। उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे गुप्धातोर्गुप्तिज्किद्भ्यः सन्निति स्वार्थे सन्प्रत्ययः। यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति। तस्याहं न प्रणश्यामि स च मे न प्रणश्यतीति भगवद्वचन-समानार्थको मन्त्रोऽयम्॥ ६॥

इममेवार्थं द्वितीयो मन्त्रो वदतीत्याह—यस्मिन्निति। अनुष्टुब्यस्मिन्नवस्था-विशेषे विजानतः सर्वाणि भूतान्यात्मनि सन्ति। आत्मा च सर्वभूतेष्वस्तीति विशेषेण ज्ञानवतः पुरुषस्य सर्वस्य खल्विदं ब्रह्मेत्यादिवाक्यार्थविचारेण सर्वा-णि भूतान्यात्मैवाभूत्। भवन्ति सर्वभूतेष्ववस्थित आत्मैक एवेति ज्ञानं भवति। सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः। सर्वथा वर्तमानोऽपि स योगी मयि

वर्तत इति भगवदुक्तेः । तत्रावस्थाविशेष एकत्वमात्मैकत्वमनुपश्यतस्तस्य को मोहः कः शोकश्चाविद्याकार्ययोः शोकमोहयोः सर्वथाऽसंभवात्सकारणकस्य संसारस्यात्यन्तमुच्छेद इति भावः । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परावर इति श्रुतेः ॥ ७ ॥

एवंभूतात्मज्ञानिनः फलमाह—स इति । जगति योऽधिकारी पूर्वोक्तप्रकारेणाऽऽत्मानं पश्यति स ईदृशमात्मानं पर्यगात्प्राप्नोति छन्दसि लुङ्लङ्लिट इति सूत्राद्वर्तमाने लुङ् । कीदृशं शुक्रं शुक्लं शुद्धं रलयोरभेदाद्विज्ञानानन्दस्वभावम् । अकायं न विद्यते भोगार्थं कायः शरीरं यस्य सः । तमकायत्वादेवाव्रणमच्छिद्रं पूर्णमित्यर्थः । अस्नाविरं न विद्यन्ते स्नावाः शिरा यस्य सोऽस्नाविरस्तम् । अकायमित्यनेन लिङ्गशरीरनिषेधः । अस्नाविरमिति स्नावोपलक्षितधातुमयस्थूलशरीरनिषेध इत्यपुनरुक्तिः । अत्रैव हेतुगर्भविशेषणमाह—शुद्धमनुपहतं सत्त्वरजस्तमोभिः एतदेव स्पष्टयति—अपापविद्धं न पापैर्विद्धं क्लेशकर्मविपाकाशयैरस्पृष्टमीदृशमात्मानं ज्ञानी पर्यगादित्यन्वयः । कायादिरहितोऽपि परमात्मा जगत्सर्जनादि करोत्यचिन्त्यशक्तित्वादित्याह—कविरिति। ज्ञानी यं पर्येति स आत्मा शाश्वतीभ्यः समाभ्यः शाश्वतीषु समासु विभक्तिव्यत्ययः । याथातथ्यतो यथातथाभावो याथातथ्यं याथार्थ्यं तेन यथार्थस्वरूपानर्थान्पदार्थान्व्यदधाद्विदधाति । कीदृशः स कविः क्रान्तदर्शी सर्वज्ञो मनीषी मेधावी ज्ञानस्वरूपः परिभूः परिभवति सर्वं वशी करोतीति परिभूः । स्वयंभूः स्वयमेवान्यदनपेक्ष्य भवतीति स्वयंभूः स्वतन्त्रः कविरित्युत्तरार्धमुपासितुः फलकथनपरमिति केचिद्व्याचक्षते तत्प्रक्रमभङ्गादुपेक्ष्यम् ॥ ८ ॥

इदानीं पूर्वोक्तप्रकारेणा नात्मविदः कर्मनिष्ठाः सन्तः कर्म कुर्वन्त एव ये जिजीविषन्ति तान्प्रत्युच्यते—

अन्धं तम इति । षडनुष्टुभः । विद्याविद्ययोः समुच्चिचीषया प्रत्येकं निन्दोच्यते । ये जना अविद्या विद्याया अन्याऽविद्या कर्म तां केवलामुपासते कुर्वन्ति स्वर्गार्थानि कर्माणि केवलमनुतिष्ठन्तीत्यर्थः । अविद्येत्यत्र तदन्यार्थे नञ्ब्राह्मण इतिवत् । ते प्राणिनोऽन्धमदर्शनात्मकं तमोऽज्ञानं प्रविशन्ति संसारपरम्परामनुभवन्तीत्यर्थः । ततस्तस्मादन्धात्मकात्तमसः संसाराद्भूय इव इव एवार्थः । बहुतरमेव तमस्ते प्रविशन्ति ते के ये उ ये पुनर्विद्यायामात्मज्ञाने देवताज्ञान एव रताः कर्म हित्वा विहितकर्माननुष्ठानेन प्रत्यवाये सत्यन्तःकरणशुद्ध्यभावेन ज्ञानानुदयादिति भावः । अन्येऽमुं मन्त्रमन्यथा व्याकुर्वन्ति । यथा—आत्मयाथार्थ्यज्ञानस्यैवान्यथाज्ञाननिन्दयाऽऽवश्यकत्वोपपादनायान्यथाज्ञानस्योक्तमसुर्यलोकसाधनत्वमनूद्यान्यथाज्ञानानिन्दनस्य

ततोऽप्यधिकानर्थसाधनत्वमन्येन मन्त्रेणोच्यते । न तु केवलकर्मनिन्दनं तद्भावे विद्याया अध्यवसायत्वाभावात्केवलकर्मणामप्रसक्तेः । कुर्वन्नेवेह कर्माणि जिजीविषेदित्येवकरणं कर्मात्यन्तायोगव्यवच्छेदार्थेन केवलकर्मकरणविधानाभावाच्च । अत्रैवं योजना—केऽविद्यामन्यथाज्ञानमुपासते तेऽन्धं तमो नाम नरकं प्रविशन्ति । असन्नेव स भवति । असद्ब्रह्मेति वेद चेदिति श्रुतेः । अथ ये जना विद्यायामु आत्मयाथार्थ्यज्ञान एव रता न त्वन्धं तमः साधनान्यथाज्ञाननिन्दने ते ततोऽन्यथाज्ञानं प्राप्य तमसः सकाशाद्भूय इव बहुतरमेवान्धं तमः प्रविशन्तीति ॥ ९ ॥

ज्ञानकेवलकर्मणोः फलभेदमाह—अन्यदेवेति । विद्ययाऽऽत्मज्ञानेनान्यदेव फलममृतरूपमाहुर्ब्रह्मवादिनः । अविद्यया केवलकर्मणा साध्यमन्यदेव फलं पितृलोकादिरूपमाहुर्विद्वांसः । कर्मणा पितृलोको विद्यया देवलोको देवलोको वै लोकानाꣳ श्रेष्ठस्तस्माद्विद्यां प्रशꣳसन्तीत्यादिश्रुतेः । कथमेतदवगतमित्यत आह–इतीति । इत्येवं शुश्रुम श्रुतवन्तो वयं धीराणां धीमतां वचनम् । य आचार्या नोऽस्मभ्यं तत्कर्म च ज्ञानं च स्वरूपफलतो विचचक्षिरे व्याख्यातवन्तस्तेषामयमागमः पारम्पर्यागत इति भावः । द्वितीयपक्षे तु विद्ययाऽऽत्मयाथार्थ्यज्ञानेनान्यदेव मोक्षैकदेशलक्षणं फलं प्राप्यमाहुर्वृद्धा अविद्ययाऽन्यथाज्ञाननिन्दयाऽन्यदेव मोक्षैकदेशफलरूपं फलमाहुरिति धीराणां वचनं शुश्रुम ये धीरा नोऽस्मान्प्रति तन्मोक्षसाधनं विचचक्षिरे व्याचचक्षिरे तस्मादुपपन्नः समुच्चय इति ॥ १० ॥

समुच्चयमाह—विद्यामिति । विद्याऽऽत्मज्ञानमविद्या कर्मान्यथाज्ञाननिन्दनं वा चद्वयं परस्परसमुच्चयार्थं तदुभयं सह ये पुरुषार्थहेतुत्वेन यो वेद, एकेनैव पुरुषेणानुष्ठेयमिति जानाति । सोऽविद्ययेश्वरार्पणबुद्ध्याकृताग्निहोत्रकर्मणा मृत्युं मारकमन्तःकरणमलं तीर्त्वाऽन्तःशुद्ध्या कृतकृत्यो भूत्वा विद्ययाऽऽत्मज्ञानेनामृतं भावप्रधानो निर्देशः । अमृतत्वं मोक्षमश्नुते प्राप्नोति। उक्तं हि श्रीगीतायां भगवता—यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । एकं सांख्यं च योगं च यः पश्यति स पश्यतीति । सांख्ययोगशब्दौ ज्ञानकर्मपरौ ॥ ११ ॥

उक्तमेवमुत्तरमन्त्रत्रयेण समर्थ्यते । अन्धं तम इति । येऽविद्यामुपासते तेऽन्धं तमः प्रविशन्तीत्युक्तम् । तत्राविद्यास्वरूपमुच्यतेऽसंभूतिमिति ये । प्राणिनोऽसंभूतिं नास्ति संभूतिर्जगत उत्पत्यादिर्यस्मात्सोऽसंभूतिस्तं संभूतेरुपलक्षणत्वात् । परमेश्वरो न जगदुत्पत्त्यादिकर्ताऽपि तु स्वभावत एवोत्पद्यतेऽवतिष्ठते नश्यतीत्यात्मानमुपासते । तेऽन्धं तमः प्रविशन्तीत्यर्थः । यतो वा इमानि

भूतानि जायन्ते येन जातानि जीवन्तीत्यादिश्रुतेः । यत्प्रयन्त्यभिसंविशन्तीत्यादिश्रुतिविरुद्धत्वात् । असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् । अपरस्परसंभूतं किमन्यत्कामहेतुकम् । एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः । प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः । आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि । मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिमिति भगवदुक्तेश्च । अन्यत्पूर्ववत् । यद्वा यमनियमादिसंबन्धवान्विज्ञानात्मा कश्चिन्नास्ति । जलबुद्बुदवज्जीवाः । मदशक्तिवद्विज्ञानमित्यादिदुर्वादिनो बौद्धा अनेन निन्द्यन्ते । ये नरा असंभूतिं न संभूतिरसंभूतिस्तां मृतस्य पुनः संभवो नास्ति । अतः शरीरान्तेऽस्माकं मुक्तिरेवेति य उपासते सिद्धान्तयन्ति तेऽन्धं तमः प्रविशन्ति । तथा य उ ये च संभूत्यामेव रताः संभवत्यस्या इति संभूतिः परदेवता तत्रैवाऽऽसक्ताः कर्मपराङ्मुखाः स्वबुद्धिमालिन्यमजानाना आत्मज्ञानमात्र एव रता आत्मैवास्ति नान्यत्कर्मान्यदिति कर्मकाण्डज्ञानकाण्डयोः संबन्धो नास्तीत्यभिप्रायवन्त इत्यर्थः । ते नरास्ततोऽन्धात्तमसो भूय इव इवशब्दो निपातो बह्वर्थो बहुतरं तमो विशन्ति । यद्वा व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्येकं निन्दोच्यते तेन यथासंभवनं संभूतिः कार्यस्योत्पत्तिस्तस्या अन्या असंभूतिः प्रकृतिः कारणमव्याकृताख्यं तामसंभूतिमव्याकृताख्यं प्रकृतिकारणम् । अविद्याकामकर्मबीजभूतामदर्शनात्मिकां य उपासते ते तदनुरूपमेवान्धं तमः प्रविशन्ति संसारमेव प्राप्नुवन्ति । ये तु संभूत्यां कार्यब्रह्मणि हिरण्यगर्भादावेव रतास्ते ततस्तस्मादपि भूयो बहुतरमेव तमः प्रविशन्ति ॥ १२ ॥

अथोभयोरुपासनयोः समुच्चयकारणमवयवतः फलभेदमाह—अन्यदेवेति । संभवात्संभूतेः कार्यब्रह्मोपासनादन्यदेव पृथगेवाणिमाद्यैश्वर्यलक्षणं फलमाहुः कथयन्ति धीराः । तथाऽसंभवादसंभूतेरव्याकृतोपासनादन्यदेव फलमुक्तमन्धं तमः प्रविशन्तीत्याहुः । क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसामिति भगवदुक्तेः । इत्येवंविधं धीराणां धीमतां वचः शुश्रुम । वयं श्रुतवन्तो ये धीरा नोऽस्माकं तत्पूर्वं संभूत्यसंभूत्युपासनफलं विचचक्षिरे व्याख्यातवन्तः॥ १३ ॥

उक्तं सर्वमुपसंहरति—संभूतिं चेति । संभूतिं सकलजगत्संभवैकहेतुं परब्रह्मविनाशं विनाशोऽस्यास्तीति विनाशम् । अर्शआदिभ्योऽजित्यच्प्रत्ययः । विनाशधर्मकं शरीरादिसंसारतदुभयं शरीराशरीररूपं द्वयं यो योगी सहैकीभूतं वेद जानाति । नित्यानित्यं वस्तु विवेचयतीत्यर्थः । देहभिन्नोऽहं देही वासं कर्मनिमित्तमिति ज्ञात्वा शरीरेण ज्ञानोत्पत्तिकराणि निष्कामकर्माणि कृत्वेश्वरेऽर्पयतीति भावः । स ज्ञानी विनाशेन विनाशवता शरीरेण सात्त्विककर्मानुष्ठानद्वारा मृत्युं तीर्त्वाऽन्तःकरणशुद्धिं संपाद्य संभूत्याऽऽत्मज्ञानेनामृतत्वमश्नुते मुक्तिं प्राप्नोति । यद्वाऽस्या अर्थान्तरम् । यथा—संभूत्यसंभूत्युपासनयोरेकपुरुषार्थत्वात्समुच्चय एव युक्त इत्याह—संभूतिं चेति । अत्र विनाशं विनाशेनेतिशब्दद्वयेऽवर्णलोपो द्रष्टव्यः पृषोदरादित्वात्साधुरन्यदाहुरसंभवादिति प्रक-

रणात् । संभूतिं विनाशं च व्याकृताऽव्याकृतोपासनद्वयं यः सह वेदोभयमुपास्त इत्यर्थः । स योग्यविनाशेनाऽव्याकृतोपासनेन मृत्युमनैश्वर्यमधर्मकामादिदोषजातं च तीर्त्वाऽतिक्रम्य संभूत्या हिरण्यगर्भोपासनेनामृतं प्रकृतिलक्षणमश्नुते प्राप्नोति । यद्वा संभूत्या संभवतीति संभूतिर्हिरण्यगर्भादिदेवता तया संभूत्या संभूत्युपासनया मृत्युमन्तःकरणमलादिरूपं तीर्त्वाऽतिक्रम्याविनाशेन विनाश उपलक्षणमुत्पत्तिविनाशादिदोषरहितेन परात्मना तज्ज्ञानेनामृतं मोक्षमश्नुते । इति भिन्नक्रमेण पदयोर्व्याख्यानम् ॥ १४ ॥

एवं प्राप्ताधिकारं शिष्यं प्रति परमात्मस्वरूपं निरूप्य तत्साक्षात्कारो मोक्षसाधनमित्यतीतग्रन्थेनोक्तम् । स चेश्वरसाक्षात्कारो न श्रवणादिमात्रेण भवति । नापि मोक्षः साक्षात्कारमात्रेण किंतु भगवदनुग्रहादेव । नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेनायमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामिति श्रुतेः । अतोऽनुष्ठितश्रवणमननादिकेनापि साक्षात्कारार्थं प्राप्तसाक्षात्कारेणापि च मोक्षार्थं यथा भगवत्प्रार्थनं कार्यं तत्प्रकारप्रदर्शनार्था हिरण्मयेन पात्रेणेत्याद्युत्तरमन्त्राः । तत्राऽऽदित्यरूपोपासनमाह—हिरण्मयेन पात्रेणेति । अनुष्टुब्हिरण्मयमिव हिरण्मयं ज्योतिर्मयं यत्पात्रं पिबन्ति यत्र स्थिता रश्मयो यत्र स्थितानिति पात्रं सूर्यमण्डलं तेन तेजोमयेन मण्डलेन सत्यस्याऽऽदित्यमण्डलस्थस्याविनाशिनः पुरुषोत्तमस्य श्रीभगवतो मुखं मुखमिति सर्वविग्रहोपलक्षणम् । लीलाविग्रहस्वरूपमपिहितमाच्छादितं वर्तते यत्तन्मुखं हे पूषन्पुष्णातीति पूषा तत्संबोधनं हे भक्तपोषक परमात्मंस्त्वमपावृणवपावृतमनाच्छादितं कुरु । किमर्थं, सत्यधर्माय दृष्टये । सत्यं सत्यज्ञानानन्दात्मकं त्वद्रूपं धारयति हृदये चिन्तयतीति सत्यधर्मा तस्मै चतुर्थी षष्ठ्यर्थे सत्यधर्मस्य मदादिभक्तजनस्य दृष्टये दर्शनाय साक्षात्काराय दृशिर्प्रेक्षणेऽस्माद्भावे क्तिन्प्रत्ययः। व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां ष इति शस्य षत्वं ष्टुनाष्टुरिति ष्टुत्वमित्यृषिप्रार्थनम् ॥ १५ ॥

एतदेव स्पष्टीकृत्य ऋषिर्याचते—पूषन्निति । उष्णिग्यजुरन्तोष्णिक्त्रिपदाऽन्त्यो द्वादशक इति वचनात् । हे पूषन्हे एकर्षे । एकश्चासावृषिश्चैकर्षिः । ऋष ज्ञाने हे मुख्यज्ञान हे यम यमयति सर्वमिति यमो योऽन्तरो यमयतीति श्रुतेः । हे सूर्य । सूरिभिर्ज्ञेयत्वात्स सूर्यः सूरिशब्दात्तद्धितो यत् । यस्येति चेतीकारलोपः । हे प्राजापत्य । प्रजानां पतिः प्रजापतिर्हिरण्यगर्भस्तस्य वेदोपदेष्टृत्वेन प्रिय यो ब्रह्माणं विदधाति पूर्वं तस्मै वेदांश्च प्रहिणोति सर्वानिति श्वेताश्वश्रुतेः । मदीयान्त्ररश्मीन्प्रकाशयन्व्यूह तेजःसमूहं च स्वरूपं बाह्यं च मदीयं ज्ञानं विस्तारयेत्यर्थः । तथा यत्ते रूपं कल्याणतमं परममङ्गलं मङ्गलानां च मङ्गलमिति स्मृतेरस्ति तत्ते तव प्रसादादहं पश्यामि । यद्वा हे पूषन्नेकर्षे यम सूर्य प्राजापत्य प्रजापतेर्धर्मस्यापत्य नरनारायणात्मन्त्ररश्मीन्मच्चक्षुष उपघातकान्स्वान्रश्मीन्व्यूह विगमय । तेज आत्मीयं ज्योतिः

समूहमुपसंहर मद्दर्शनयोग्यं कुरु । अन्यत्समानम् । केन प्रकारेण पश्यसीत्यत आह–य । इति योऽसौ पुरुषः पूर्षु शेतेऽसौ पुरुषोऽसौ मण्डलान्तस्थो यः पुरुषोऽसौ तदितरप्रतीकास्थितश्च पुरुषः सोऽहमस्मि भवामि सूर्यमण्डलादिप्रतीकस्थो मद्धृद्यन्तस्थो ज्योतीरूपश्चैक एवेति प्रकारेण ते रूपं पश्यामीत्यर्थः। एतादृशैक्यज्ञानस्यैव मोक्षसाधनत्वादिति भावः । अत्रासौ च शाकटायन इति प्रातिशाख्ये न यवयोः पदान्तयोः स्वरमध्ये लोप इति प्राप्तलोपप्रतिषेधादसावसाविति द्रष्टव्यम् ॥ १६ ॥

इदानीं मरिष्यतो मम वायुरध्यात्मपरिच्छेदं हित्वाऽधिदैवतात्मानमनिलं प्रविशत्विति प्रार्थयते–वायुरनिलमिति । वायुरनिलं यजुषी । ॐमितिपरमाक्षरस्य योगिनामालम्बनभूतस्य परस्य ब्रह्मणः प्रणवाख्यस्यास्थूलादिगुणयुक्तस्य ब्रह्मा ऋषिश्छन्दो गायत्रं परमात्मा देवता शब्दब्रह्मारम्भविरामे च यागहोमादिषु शान्तिपौष्टिककर्मसु चान्येषु विनियोगोऽस्य क्रतो त्रिभिर्यज्ञान्योगी स्मारयतीत्यनुक्रमणी । हे परमात्मन्मरिष्यतो मम वायुः प्राणो वायुग्रहणं सप्तदशलिङ्गोपलक्षणार्थम् । तथा च सप्तदशात्मकलिङ्गरूपः प्राणोऽध्यात्मपरिच्छेदं हित्वाऽधिदैवतरूपं सर्वात्ममममृतं सूत्रात्मानमनिलं मुख्यप्राणं प्रतिपद्यतामिति वाक्यशेषः । वायुर्वै गौतम तत्सूत्रेण वायुना हि गौतम तत्सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्तीति श्रुतेः। ज्ञानकर्मसंस्कृतं लिङ्गमुत्क्रमयत्वित्यर्थः । अथानन्तरमिदं स्थूलशरीरमग्नौ हुतं सद्भस्मान्तं भस्मैवान्तो यस्य तद्भस्मान्तं भस्मावसानं भूयात्कृतप्रयोजनत्वात् । ॐप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्रह्माभेदेनोच्यते ॐ हे क्रतो संकल्पात्मक स्मर यन्मम स्मर्तव्यं तस्यायं कालः समुपस्थितोऽतः स्मर यस्त्वं ब्रह्मचर्ये गार्हस्थ्ये च मया परिचरितस्तत्स्मर । तथा कृतं यन्मया बाल्यप्रभृत्यद्य यावदनुष्ठितं कर्म तच्च स्मर । क्रतो स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् । यद्वा प्रत्यक्षत एव देहस्य भस्मान्तत्वदर्शनाद्देहनाशे च तदन्तर्गतस्य ब्रह्मणो जीवन्मरणाद्यवश्यंभावादित्याशङ्कायामिदमुच्यते । अत्रायमर्थो यद्यपीदं शरीरं भस्मान्तं दृश्यते तथाऽपि तदन्तर्वर्तिनः परमेश्वरस्य न मरणादिदोषप्रसङ्गः । कुतो व्यत्ययादनिलमनिलो वायुर्यदाऽमृतममृतोऽथ तदा ब्रह्मामृतमिति किं वक्तव्यं तदमृतत्वस्य कैमुत्यसिद्धत्वादिति । ननु संसारिणो वायोः कथममृतत्वं संभवति यदुपचारेण तर्हीश्वरस्यापि तथाविधममृतत्वं स्यादित्याशङ्क्य वायोर्देहनाशेऽपि तत्कार्यविज्ञानतिरोभावाभावोऽस्त्येव । वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः सर्वाणि च भूतानि संदृब्धानि भवन्ति । म्लेच्छन्ति ह्यन्या देवता न वायुः सैषाऽनस्तमिता देवता यद्वायुरिति बृहदारण्यकश्रुतेः । अथ प्रणवप्रतीकं प्रार्थयते—ॐमिति । ॐ ओतत्वादिगुणयुक्त हे क्रतो ज्ञानरूप मां स्मर । मया कृतं ध्यानादिकं च स्मर । अभ्यासस्तात्पर्यार्थः । अभ्यासेनार्थविशेषं मन्यत

इति यास्कोक्तेः परमात्मकर्तृकं स्मरणं भक्तानुग्रहोन्मुखं त्वमेव । अवतीत्योम् । अत्र रक्षण इत्यस्माद्धातोरन्येभ्योऽपि दृश्यन्त इति मनिन् । ततोऽवतेष्टिलोपश्चेति पञ्चमीनिर्देशादवतेः परस्य मनिनष्टिलोपे कृते ज्वरत्वरस्त्रिव्यविमवामुपधायाश्चेति धातोरकारवकारयोरूठौ तयोः सवर्णदीर्घे सति सार्वधातुकेति गुणे रूपसिद्धिर्धातोरन्तत्वादुदात्तत्वं त्रिमात्रत्वं प्रातिशाख्यात् ॥ १७ ॥

साक्षात्कारप्रार्थनानन्तरमग्निप्रतीकं भगवन्तं मोक्षं प्रार्थयते—अग्ने नयेति । अगस्त्यदृष्टाऽऽग्नेयदेवत्या? अन्ते यज्ञान्योगी स्मारयतीति कात्यायनस्मरणात् । हे देव क्रीडादिगुणविशिष्ट हेऽग्नेऽग्निप्रतीक भगवन्नस्मान्सुपथा शोभनेन मार्गेण देवयानलक्षणेन नय गमय । सुपथेति विशेषणं दक्षिणायनमार्गनिवृत्त्यर्थम् । यतो गतागतलक्षणेन दक्षिणायनमार्गेण निर्विण्णा वयं यतोऽग्ने त्वां याचामहे । पुनर्गमनागमनवर्जितेन शोभनमार्गेणास्मान्कर्मफलविशिष्टान्नय । सुपथेत्यत्र ऋक्पूरब्धूःपथामानक्ष इति अप्रत्ययो नानित्यत्वात्समासान्तविधेः । वृद्धिरादैच् इतिवत् । किमर्थं राये धनाय मुक्तिलक्षणाय । कीदृशस्त्वम् । विश्वानि सर्वाणि वयुनानि कर्माणि प्रज्ञानानि वा विद्वाञ्जानन्किंच जुहुराणं हुर्छा कौटिल्ये । शानच्,जुहोत्यादित्वेन द्वित्वादौ सति रूपम् । कुटिलं प्रतिबन्धकवञ्चनात्मकमेनः पापमस्मदस्मत्तः सकाशाद्युयोधि पृथक्कुरु वियोजय नाशयेत्यर्थः । यु मिश्रणामिश्रणयोरदादित्वाच्छब्लोपाद्द्वित्वे छान्दसं हेर्धित्वम् । ततो विशुद्धाय ते तुभ्यम् । अनुदात्तत्वाद्युष्मदादेशः । भूयिष्ठां बहुतरां नमउक्तिं नमस्कारवचनं विधेम कुर्याम । ईदृशाभीष्टसाधकस्य तव प्रतिकरणं नमस्कारपरम्परैव नत्वन्यत्प्रत्युपकरणमस्तीति भावः । यद्वा हे देवाग्नेऽस्मान्सुपथा पुनरावृत्तिवर्जितेनार्चिरादिमार्गेण राये मोक्षाख्यवित्ताय नय मुक्तिदो भव । कुतो हे देव आसंसारमस्मदनुष्ठितानि विश्वानि पूर्णानि मोक्षाय पर्याप्तानि वयुनानि सत्कर्माणि । वयुनमिति कर्मनामेति निघण्टूक्तेः । यद्वा वयुनानि श्रवणमनननिदिध्यासरूपाणि ज्ञानानि भवान्वेद त्वद्दत्तया वयुनयेति भागवते वयुनशब्दस्य ज्ञानार्थकत्वात् । ननु प्रारब्धकर्मभिर्बद्धस्य तव कथं मोक्ष इत्यत आह—अस्माञ्जुहुराणमल्पान्कुर्वत् । संसारे परिवर्तयादित्यर्थः । ह्वर चलन इति धातुः । छान्दसत्वेन ह्वादिरीदृशमेनः पापमनिष्टं कर्मेत्यर्थः । तदस्मदस्मत्तो युयोधि वियोजय वयं च ते तुभ्यं भूयिष्ठां नमउक्तिं विधेम । नच प्रकारान्तरेण प्रतिकर्तुं शक्नुम इत्यर्थः ॥१८॥ इति चत्वारिंश एक एवानुवाकः ।

इति श्रीमन्नागदेवभट्टात्मजेन प्रथमशाखिना श्रीमदनन्ताचार्येण विद्वज्जनकृपापात्रभूतेन विरचितायां वेदार्थदीपिकायां काण्वशाखीयसंहिताभाष्ये चत्वारिंशोऽध्यायः ॥

॥ ॐ तत्सत् ॥